# उपसंहारः

Conclusion

## — उपसंहार: —

### ।। काल पत्रकम् ।।

विश्वे ऽस्मिन् सर्वेषां व्यवहाराणां मध्य बिन्दु रूपेण अयं काल: एव वर्तते कालस्य प्राधान्यं अखिलविश्वे समान्यतयैव स्वीकृतं वर्तते । काल: एव मनुष्यं जन्मत: आरम्य मृत्युपर्यन्तं साहाय्यं दत्वा गतिप्रदानं करोति । काल: एव अस्मिन् ब्रह्माण्डे चरंतम् तेजोमयं गोलं स्वशक्त्या, स्थित्या गत्यानुसारं भ्रमणं कारयति । अस्मिन् ब्रह्माण्डे अनेक तेजोबिन्दव: (~~बिन्दुनि~~), तारकाणि, नक्षत्राणि, ग्रहा: तथा च अस्य जगत: नयनरूपी सूर्यचन्द्रमसौ कालस्य मूलरूपे वर्तेते । समस्तेऽस्मिन् संसारे सूर्योदयोम दिनस्य आरम्भ:, तथा च सूर्यास्तेन रात्र्यारंभ: भवति, अनया रीत्या मनुष्येण कालज्ञानं प्रथममेव आदिकालात् सूर्यादेव अनुभूतं वर्तते । वनेषु सुंदरेषु पर्वत प्रदेशेषु, रमणीयेषु विविध सुगन्धयुक्त पुष्पकल्युक्तेषु वनेषु सागरतटे, समुद्रमध्ये स्थितेषु भूमिखण्डेषु, नदीमूलस्थलेषु त्रिकोणप्रदेशेषु-एतादशेषु विविधेषु अतीव एकान्तस्थानेषु सूर्यदेव कालस्य ज्ञानं भवति । सूर्यदेव अस्य विश्वस्य जन्म, जीवनं तथा च लय: अर्थात् कालप्रमाणं निश्चीयते । अस्मात् कारणात् प्रथमं सूर्य: एव कालस्य प्राण वर्तते । तस्मात् कारणात् जनजीवनं सूर्योपरि आधारितं वर्तते ।

वर्तमानेऽस्मिन् काले नित्यं प्रात: दैनिकप्रमाणां विविध-शुभाशुभ समाचारा:, राजकीय मतमतान्तराणि, दैव द्वारा कृता: अथच कृत्रीमरूपेण या: क्रिया: सन्ति, न्यायालय जनित कलहानाम् नूतन प्रकारा:, लग्नस्य

दुःखदायकाः, भ्रष्टाचारिणां, व्यभिचारिणां तथा च तासां उदरपूरणयाचिकानां, लग्नविच्छेदानां-सत्यासत्योपरि आधारित प्रसंगाः , वर्गविग्रहाणां, वैरभावेन कृत्रिम-मृत्युः, एतादृशान् समाचारान् पठित्वा वयं दुःखं अनुभवामः । एतादृशानां बहूनां दुःखदायकानां प्रसंगानां निराकरणं कालज्ञानेन निवारणं च शक्यते । अस्मिन् जीवने मनुष्यस्य सुखस्य कालः अल्पः एव तथा च दुःखस्य कालः दीर्घः अवगम्यते, किन्तु अयं विचारः सामान्यः तथा च क्षणभंगुरः वर्तते । वर्तमानेऽस्मिन् मनुष्याः पुरुषार्थमेव दुःखं मन्यन्ते- तद् अलीकम् । भगवता श्रीकृष्णेनापि श्रीमद्भगवद्गीतायां उक्तं यत् —

'कर्मण्येवाधिकारस्ते मा फलेषु कदाचन' - इति ।

इदं गीतासूत्रं मनुष्यं दृढपरिश्रमं कर्तुं प्रेरयति । अथ च दृढपुरुषार्थकरण पश्चात् मनुष्यः सुखानुभवं कर्तुं शक्नोति इति प्रतिपाद्यते । धर्मार्थकामाः इति त्रयी पुरुषार्थाः मनुष्याय काल सन्देशं यच्छति । तथा च ज्ञापयति यत् सर्वान् कार्यान् कालमनुसृत्य कर्तुं अथवा यथाकालं कुर्युः । तदेव मनुष्यः सुखकालस्य आनन्दं प्राप्तुं शक्नोति ।

इह जगति मनुष्यः परस्परं, अथवा द्वितीयं मनुष्यं अयं अतीव सुखी इति मन्यते । अपरमनुष्यात् सः अल्प सुखी इति मन्यते । किन्तु स० एव सुखी वर्तते यः कालं ज्ञात्वा पुरुषार्थं करोति । 'सन्तोषः परमं सुखम्' अस्य वाक्यस्य मन्यमानः मनुष्यः नकदापि दुःखी भवति । सात्विक गुणयुक्तः जनः अन्येषां मनुष्याणां दृष्ट्वा दुःखी वर्तते, किन्तु मूले तु अयं घटने सः कालज्ञाता तथा च सुखी एव वर्तते ।

कार्यकारणयोराश्रयं कृत्वा तथा च अनुसरणं कृत्वा विद्वासः, सज्जनाः कालं यापयन्ति । कालः एव प्राणिपदार्थवनस्पतिषु पाकं करोति । कालः एव

निश्चितां स्थितिं नूतन-जीर्णां अथवा दुर्गन्ध- सुगन्धा स्थिति कारयति । काल: एव मनुष्यान् जागृति आवयति तथा च पोषणं कृत्वा सहारयति एव ।

काल: प्रत्येकपदार्थानां शक्तिरेव वर्तते । प्राणिमात्रेषु मुख्यरूपेण धातु: एव । परिपक्वे यथाकाले गर्भ: वृद्धि: प्राप्य जन्म धारयति । तथा च यथाकाले लयं गच्छति । सृष्टे: उत्पत्तिकारणं संहारकारणं अयं कालदेवता एव अर्थात् काल: एव सृष्टे: उत्पत्ति-स्थितिलयकर्ता वर्तते ।

वर्तमानसमयस्य गति: अतीव सूक्ष्मा वर्तते । किन्तु सा सदा द्विप्रकारेण अस्माभि: अनुभूयते । एकं स्थूलस्वरूपं अपरंच सूक्ष्मस्वरूपं इति गण्यते । आपत्तिकाले, दु:खानुभवकाले, मित्रस्य परीक्षा, युद्धसमये शूरवीरस्य परीक्षा तथा च एकान्ते पूतिजनस्य परीक्षा वैभव सम्पत्तिनाश समये पत्नीपरीक्षा, दौर्भिक्षे प्रियअतिथि-परीक्षा भवति । विद्यायां, अर्थसंग्रहे पर्वतोपरि कामस्य धर्मस्य च सेवने कालस्य प्राधान्यं गण्यते । "कालाधीनं जगत्सर्वम्" ।। प्रारब्धवशात् कस्मिंश्चित् अपि काले या: विपत्तय: प्राप्ता: सन्ति ता: सर्वा: विपत्तय: दैववशात् सुखकारका: अपि भवन्ति । अनया रीत्या च कस्मिंश्चिदपि काले ये अर्था: वा पदार्था: सुखकारका: अथवा सुखोत्पादका: भवन्ति ते एव पदार्था: प्रारब्धहीना:, अशुभप्रारब्धवशात् विनाशं कृतवन्त: अपि भवन्ति । इदं सर्वं कालाधीनं एव भूत्वा शुभाशुभफलं प्राप्यते । अखिलं विश्वं केवलं कालाधीनं एव ।

काल: धर्मेण सह, धनसंग्रहविषये, उत्तमदृष्ट्या, ज्ञानेन सह, अनया रीत्या काल: सर्वै: सह समन्वित: वर्तते । उद्यम:, साहसं, धृति: बुद्धि: शक्ति: तथा च

पराक्रम: एते षड्प्रकारका: गुणा: कालाधीना: एव सन्ति । आलस्यं कुबुद्धिश्च एतौ द्वौ कालस्य शत्रू । समग्रं जगत् कर्माधीनं अस्ति । शारीरिक-मानसिक सुख-दु:खे कालाधीने वर्तते। तदेव पूर्वजन्मनि कर्मार्जितं भवति ।

मनुष्य: कर्मफलं यथाकाले अवश्यं भुनक्ति । सत्यं पावित्र्यं, मन: शक्ति, संयम , दया इत्याद्य: कालाधीना: वर्तन्ते । तेषु सर्वेषु सत्यं श्रेष्ठं । यथाकाले हि भाग्यं फलति । यथा प्राप्ते काले वृक्षा: फलन्ति तथैव मनुष्यै: पूर्वजन्मन: कर्मानुसारं लब्धं भाग्यं अथवा सत्कर्माणि तथा च यानि यानि च कर्माणि यथा प्राप्ते काले, तानि तानि फलानि लभ्यन्ते । `मित्रम्` इति वदारक्ष्यं रत्नस्वरूपमेव । अथ च जनेभ्य: रक्षणकर्ता, भयत्राताप्रीतिविश्वास कारणं काल: एव वर्तते । सर्वेषां दु:खानां निवारणरूप निराकरणंच, सुखाश्रयं: एक: काल: एव वर्तते । तथा च तस्य काल जीवनं, अथ च शरीरं एतयो: द्वयो: जन्म सहैव भवति । तथा च जन्ममृत्यो: मध्ये जीवनस्य अनुभव: मुख्य: एव अस्ति ।

## ।। सृष्टि दर्शनम् ।।

देवानां दानवानां पुरुषार्थरूप समुद्रमन्थन द्वारा अस्मिन् ब्रह्माण्डे चतुर्दश रत्नानां उत्पत्ते: पश्चात् विष्णुबीजस्वरूपा माया-मोहिनी भगवता महाविष्णुना उद्भूता, तथा च तस्य नाभिकमलात् उद्भूता ब्रह्मणा सृष्टे: निर्माणं कृतम् ।

भगवता विष्णुना आत्मन: त्रिगुणस्वरूपाया: सत्वरजोतमारूपाया:

त्रिगुणात्मिकाया: सृष्टे: उत्पत्ति: कृता । तासु मुख्य: (१) मोहिनी विष्णु: (२) सावित्री ब्रह्मा अथव उमा महेश्वर: प्राधान्येन वर्तन्ते । अर्थात् विष्णुबीजरूपा पुरुष प्रकृति: एव मुख्या । तथा च सृष्टिदर्शनं भवति ।

भगवता विष्णुना गीतायां विश्वरूपदर्शनाध्याय द्वारा समग्राया: सृष्टे: दर्शनं, तथा च सर्वस्वं, आद्यन्तस्थितिलया: आत्मनि एव सन्ति इति प्रतिपादितम् । भगवान् स्वयमेव सूर्यचन्द्रौ अस्ति, तथा च स: सृष्टौ सर्वेषु स्थानेषु, सर्वेषु जड-चैतन्य पदार्थेषु एकस्वरूपेण वा अनेक स्वरूपेण विराजते ।

वेदेषु-वेदांगेषु, श्रुतिषु-,स्मृतिषु ब्राह्मणोपनिषद, पुराणेतिहासेषु अपि सृष्टिदर्शन प्रदर्शितं वर्तते ।

पौर्वात्यपाश्चात्य विदुषां मध्ये सृष्टिदर्शन विषये प्रभूतं मतमतान्तरं वर्तते यत् स्वयंसिद्धेन, जगत्प्रसिद्धेन स्वस्वकाल-स्थल, संयोगानुसारेण प्रतिपादितमस्ति । वर्तमान काले च यथाकाले तस्य चर्चा संभवति । किन्तु अस्य विषयस्य चर्चायां काल-स्थलस्य व्यय: निरर्थक: एव ।

भगवता सृष्टिदर्शन विषये, जीवात्मापरमात्मनो: सम्बंधयोग:, वियोग: गुणानं, भक्तवर्ग: धर्ममूलं एतादृशेषु विविधासु गलितक्रियासु , तथा च कर्मसिद्धान्त द्वारा कृत: तथा कारितवान् । मानवै: त सिद्धान्तं आत्मन: जीवने स्वीकृत: ।

जीवात्मन: परमात्मन: च संबंध: ब्रह्माण्डस्य तेजस-गोलक पदार्थै: द्वारा

अतीव विकसित:, अथ च तेषु बृहत् सूर्यचन्द्र सदृशै: बिम्बग्रहै:, चैतन्य जन्म-मृत्युना, क्षुधा-तृषया, जडपदार्थेषु समयान्तरे संभवित-विकृतिभि:, अनया रीत्या अलौकिक विशेष सम्बंधेन मानवेच्छायां बृद्धि:, प्रवृत्ति निवृत्ति:, इच्छा इत्यादि पंचभि: तत्वै: अग्नि,भूमि:, वायु:, जलम्, आकाशम्- तथा च तेषां गुणेभ्य: तेज:, रस:, स्पर्श:, रूपम्, शब्दानां अधिकाधिक चेतना तथा च जागरूकता क्रमश: प्राप्ता ।

— हरिवंशपुराणे हरिवंशपर्वणि अध्याय-३, सृष्टिवर्णनं अध्याय:-८, कालगणना: अध्याया:६, सूर्यस्योत्पत्तिकथा अध्याय: २५, चन्द्रस्योत्पत्तिकथा भविष्यपर्व अध्याय: ३५- एभि: प्रकारै: प्रदर्शितं वर्तते । पाश्चात्यविदुषां मध्ये सृष्ट्युत्पत्तिविषये तथा च मानव विषये, डार्विन महोदयस्य उत्क्रान्तिवादमतं, तथा च अपराणां विदुषां पृथक्-पृथक् मतानि सन्ति । किन्तु भारतीयपुराणानि तस्मात् भिन्नानि एव सन्ति । उपरोक्त: हरिवंशस्य पुराणस्य संदर्भ: प्रदर्शित: अस्ति ।

भारतीय खगोलविज्ञाने प्रकृतिस्थेषु अष्टादश सिद्धान्तेषु केश्चिदपि भौतिकसुखस्य साधनै: विना केवलं दिव्याया: दृष्टे: अनुभव:,निरीक्षणं-परीक्षणं-त्यागभावनां सत्यां सिद्धि करोति ।

एतादृशै: अलौकिक मूलभूतै: सिद्धान्तै: अस्या: सृष्टे तथा च अस्य ब्रह्माण्डस्य रचना रहस्यात्मक सूत्रग्रंथै: - गूढमन्त्रै: द्वारा वेदे बोधिता वर्तते । तेषु खगोलं, भूमि, सूर्य:, चन्द्र:, ग्रहणं, भौमादिग्रहा:, धूमकेतु:, उलका, नक्षत्रमण्डलं

राशिचक्रं निहारिका, आकाशगंगा, ताराणांमंडलानि- इति केवल न पृथिव्याः किन्तु ब्रह्माण्डस्यापि वर्णनं दर्शनंच सप्रमाणं मिलति ।

पाश्चात्यविदुषां मध्ये सर्वप्रथमं `कैण्ट` महोदय द्वारा निहारिकायाः शोधकार्यसंजातं । `लाप्लास` महोदयेन ई०स० १७९६ तमे वर्षे विस्तरेण निहारिकायाः शोधकार्यं कृतं । `जीन्सः` , `जैकिरिजः`, `चैम्बरलेनः`, मूल्टन इत्यादिनां विदुषां मतानि सूर्यमण्डल विषये अल्प प्रमाणेन पृथक् - पृथक् सन्ति ।

ब्रह्माण्डस्य सृष्ट्यां मानवः एव सर्वश्रेष्ठः जीवः अस्ति । तथा च इयं पृथिवी अस्य ब्रह्माण्डस्य केन्द्रे वर्तते । इति पौर्वात्य-पाश्चात्यैः पण्डितैः स्वीकृतं वर्तते । प्रतिपादितं वर्तते । तथा च स्वयमेव सिद्ध इदं कथानकं ।

पाश्चात्य विद्वांसः मुख्यतयाः एते सन्ति- यथा-(१) आईस्टाईन महोदयः (ई०स० १८७९) (२) आइलर महोदयः (१७०७), एकृटिन महोदयः(१८६४), एडम्स-महाभागः (१८६७), एडिंग्टन महोदयः (१८८२), कप्टीन महोदयः(१८५१), काण्ट-महाभागः (१७२४), कापरनिकस महाभागः(१४७३), कैप्लर महोदयः (१५७१), गाउस महाभागः(१७७७), चैम्बरलिन महोदयः (१८४३), जीन्स (१८७७), टाइकोब्राहे (१५४६), मूल्टनः (१८७२), न्यूटनः(१६४३), पिआजी(१७४६), फूकौ(१८१९), बैसेलः (१७८४), लाप्लासः (१७४९), लौवेलः (१८५५), लैघिरिय(१८११),लैंमली (१८३४), शियापैरली(१८३८), शेपली(१८८५), स्लिफरः(१८७५), हर्शलः(१७९२), हैलिः (१६५६) ।

अस्मिन् मानव ब्रह्माण्डे श्रेष्ठानां जीवानां संभवात् `यथा अण्डे तथा ब्रह्माण्डे ` इति नियमानुसारेण मानवदेहे स्थितानां सर्वेषां ब्रह्माण्डानां तथा च ब्रह्माण्डेषु स्थितानां सर्वेषां तत्वानां स्थितिः मानवशरीरे अस्ति इति प्रसिद्धमेव ।

मानवजन्म, जीवनं, विकासः, वृद्धिः-लयः इत्यादिकं सर्वं खगोलोपरि आधारितं। मानवजीवनं ब्रह्माण्डनायकस्य सूर्यस्योपरि आधारितं वर्तते । सूर्यः कालनियामकः अस्ति । अतः सः सूर्यः `कालात्मा` इति कथ्यते । अनया रीत्या विश्वे स्मिन् कालस्यैव प्राधान्यं प्रथमे, तथा च अन्ते पि स्वीकृतं वर्तते ।

भारतीय शास्त्रं अध्यात्ममूलकं, योगवास्तुरूपं, मानवजीवन कृते कल्याणप्रदं, मानवजीवनोत्कर्षदायकं, प्रत्यक्ष-परोक्ष च शुभाशुभफलसूचकं संसारपथप्रदर्शकं धर्मादि चतुर्विध पुरुषार्थं प्रदायकं सुखशान्तिसंतोषप्रदायकं इत्यादिकं मूलभूत तत्वरूपं वर्तते ।

पाश्चात्यशास्त्रं प्रयोगवादी भौतिकसुखप्रदायकं, मानवजीवनमात्रे एव प्रत्यक्ष-फलदायकं मानवजीवनस्य रक्षक-भक्षक स्वरूपं इति मिश्र प्रकारकफलदायकं, कठोरपरिश्रम-कारकं, मानवजीवनकृते सर्वकार्याणां अतिशीघ्रगतिदायकं विज्ञानमात्रमेव` इत्यादि मूलभूत तत्वं वर्तते ।

ईश्वरः प्रकृतिः आत्मा आत्मनः कर्माणि च जगति दृष्टिगोचराः भवति । विश्वेस्मिन् वैज्ञानिक युगे सर्वशास्त्राणि खगोलोपरि आधारभूतानि सन्ति तथा च कालः एव तेषां नियामकः । वर्तमाने काले कृत्रिमोपग्रहाः दूरध्वनियन्त्राणि, दूरदर्शनकेन्द्राणि स्थानानि वा एतान्यपि सर्वाणि खगोलस्य अवलम्बनं कुर्वन्ति । अतएव ज्योतिषशास्त्रे कथितं वर्ततेयत् `अप्रत्यक्षाणि शास्त्राणि विवादस्तेषु केवलम् ।

Kalpana's

~~'अन्यानि-शास्त्राणि-विवादस्तेषु~~

प्रत्यक्षं ज्यौतिषं शास्त्रं चन्द्राकौयत्र संस्थितौ ।' इति ।

अर्थात् खगोलं सर्वशास्त्राणां नियामकत्वेन वर्तते ।

(१) ईश्वरस्तुतिशास्त्रम् :(Anthem)

श्री मार्कण्डेय पुराणे देवीमाहात्म्ये अध्याय १२ श्लोके १५-१८ तये कथितं यत् ग्रहपीडासु चोग्रासु माहात्म्यं शृणुयान्मम ।

बालग्रहाभिभूतानां बालानां शान्तिकारकम् ।। इति ।

अथ च श्रीमद्भागवते षष्ठस्कन्धे ष्टमे ध्याये नारायणकवचे श्लोक क्रमांक ३७ तस्मिन् स्थाने पि कथितं वर्तते यत् राज दस्यु ग्रहादिभ्यो व्याघ्रादिभ्यश्च कर्हिचित् ।' इति ।

(२) मानवोत्पत्तिशास्त्रे : (Anthropogemy ) डार्विन महोदयस्य उत्क्रान्तिवाद: प्रसिद्ध: वर्तते ।

संकल्प- विकल्पानुसारेण अनुकूलकर्मण: परमाणव: अस्माकं प्रति आगच्छन्ति । अनया रीत्या उत्क्रान्ती अवक्रान्ती रूपं चक्ररूपेण प्रचलति ।ईश्वरम् कर्ता- अकर्ता-दाता-भोक्ता, 'कर्तुमकर्तुं अन्यथाकर्तुम् समर्थ:' इति कथितुं- बोधितुं बोधयितुं- विषय: अतीव क्लीष्ट: तथा च तर्क्य: एव वर्तते ।

पंचेन्द्रियाणां बुद्धिराश्रय:- ज्ञानंच शब्द: स्पर्श:, रूपं, रस:, गन्ध:, तस्य च श्रोत्रे, त्वच्-चक्षु: , जिव्हा-घ्राणं चेति इन्द्रियाणां विषया: सन्ति । पंचकर्मणां बुद्धिराश्रयत्वेन भजते । कर्म च वाणी-हस्त:-पादौ पायूपस्थ-गुदा इत्येन पंच कर्मेणां विषया: सन्ति ।एकादशरूपत्वेन मनस: गणना,क्रीयते ।

(३) पुरातनशास्त्रे( Antiquity ) संस्कृते: चिन्हानि शीलालेखोपरि कालस्य व्यक्ते: स्थानानां च नाम्नां निर्देश: संभवति ।

kalpana's

(४) पुराणं वास्तुशास्त्रं :ज्योतिषशास्त्रे- वास्तुराजवल्लभे च संहिता- ग्रन्थे राजगृहमन्त्रीगृह देवाल्यानां तथा च देवमूर्तीनां मान-प्रमाणानि विनिश्चतानि सन्ति । (बृहत्संहिता-पृष्ठ ३१७ तः ३८०), बृहत्संहिता-अ-५३,वास्तुज्ञानोत्पत्ति विषये श्लोक क्रमांक २-३ नृपादिगृहप्रमाणं श्लोक क्र-४ तः १६ अथ च २२ तः ३०, वास्तुप्रकार विषये श्लोक क्रमांक-३१ तः ५०

वर्तुलं- (एकाशीतिपद वृत्तं, त्रिकोण चतुष्षष्टिपदे श्लोक क्रमांक-५१ तः ५६ शल्यशोधनज्ञान-प्रकारे श्लोक क्रमांक-५१ तः ६२
तथा च भूमिदर्शनं, परीक्षणं, शल्यशोधनं,काकिणी-आयव्ययं, वास्तु प्रकाराः गृहनामानि इत्यादीनां वर्णनं सप्रमाणमेव । अस्मिन् शास्त्रे अर्वाचीन-प्राचीन रीत्या निवासस्थावस्य आलेखाः अपि प्रसिद्धाः । नगरनिर्माण प्रकाराणि अपि प्रदर्शितानि सन्ति । अर्वाचीन समये अतीव चर्चितं पर्यावरणस्य-प्रदूषणं च लक्ष्यीकृत्य तस्य निर्माण साधन प्रकाराः बोधिताः सन्ति ।

(७)पुस्तकालय शास्त्रम्( Library Science & Museology ) : प्राचीनकाले राज्याश्रित पुस्तकाल्यानां आयोजनं शास्त्रीयपद्धत्या, जनानां ज्ञानविवृद्धये कृतं स्यात् । तथा च पुस्तकानां-हस्तलिखित प्रत-पुस्तकानांच रक्षणं वनस्पतिज औषधैः द्वारा कृतं स्यात् । इदं शास्त्रं संशोधनस्य मुख्यं अंगं वर्तते ।

(८) जीवशास्त्र( Biology ) जीवविद्या(Palaeontoloty ) :

बृहज्जातकादि होराशास्त्रस्य ग्रन्थे जीवशास्त्रस्य वर्णनं वियोनिजन्माध्याये प्रदर्शितं वर्तते ।

(९) वनस्पतिशास्त्र( Batony ) : कृषिशास्त्रं च । अस्मिन् शास्त्रे बीजवापन मुहूर्तविषयेक, धान्यरोपणमुहूर्तं विषये, धान्यच्छेदन मुहूर्तं विषये चर्चा कृता वर्तते ।

अथ च ज्योतिषशास्त्रे, होराशास्त्राणां ग्रन्थेषु वनस्पतिशास्त्रस्य, औषध शास्त्रस्य, पर्यावरण-प्रदूषण विषयकस्य इत्यादि मानव जीवनस्य आरोग्याय स्वीकारः कृतो वर्तते । आयुर्वेदे पि नक्षत्रोपरि आश्रितां वनस्पतिं आनीय, औषधं कृत्वा तस्योपयोगः मानव-कल्याणाय क्रीयते । जलरहित देशे यदा जम्बूवृक्षं वर्तत तदा ४३ उत्तरे १२ अधस्तात् जलसंभवः । यदा बिलं, इत्यादिकं वर्तत तदा १२ अधस्तात् मधुरं जलं संभवति । गुलरवृक्षस्य पश्चिमे ५ दूरे तथा च १० अधस्तात् जलप्राप्तिसंभवति । अर्जुन वृक्षस्य ५ उत्तरायां ५ पश्चिमायां तथा च २१ अधस्तात् जलप्राप्तिः संभवति । बिभीतक वृक्षस्य दक्षिणायां १५ अधस्तात् जलसंभवना अस्ति ।

उद्यानभूमिः, उद्यानवृक्षः वृक्षारोपणकालः, नियमः, विधिः क्रमः वृक्षरोगोत्पत्तिकारणं तस्य चिकित्सा वृक्षारोपण नक्षत्रं इत्यादीनां वर्णनं वनस्पतिशास्त्रे प्रदर्शितं ।

हलप्रवहणमुहूर्तं, बीजवापन मुहूर्तं, लतारोहणमुहूर्तं, धान्यारोपण मुहूर्तं, धान्यच्छेदन मुहूर्तं इत्यादीनां वर्णनं वनस्पति-कृषिशास्त्रे आगच्छति ।

पण्डितश्री शान्तिदूतरूपश्री जवाहरलाल नेहरू द्वारा पंचवर्षीय योजनान्तर्गत ग्रामविकास योजना कृषिवलकल्याण योजना इत्यादि अनेकाः योजनाः संभूताः ।

महाकविना कालिदासेनापि स्वनिर्मित कुमारसम्भव नाम महाकाव्ये वनस्पतिशास्त्रस्य परिचयः कृतो वर्तते ।

(१०) सुन्दरं हस्तलिपिशास्त्रम् :( Cardigraphy ) :

हस्ताक्षरं आधारीकृत्य भविष्यत्कालस्य तथा च जनस्य व्यक्तित्व विषयकस्य विचारः क्रीयते । अधुना आर्थिक-सामाजिक रूपं दुष्कर्मेषु अस्य शास्त्रस्योपयोगस्य अतीव प्रचारः प्रसारः वा वर्तते ।

(११) नागरिक शास्त्रम्( Civics ) : समाज सेवाशास्त्रम् ( Social Work )

समाजशास्त्रम्( Sociology ), राजनीतिशास्त्रम्( Political Science ): अस्मिन् शास्त्रे ग्रहयोगानाश्रित्य मानवानां व्यक्तित्वविषयकस्य तथा च आत्मनः, कुटुम्बस्य, समाजस्य देशस्य संस्कृतेः सर्वोपभोगाणां, कर्तव्यस्य विचारः कृतो वर्तते ।

(१२) वाणिज्यशास्त्रम्( Commerce )

ग्रहयोगाननुसृत्य युतेः, प्रतियुतेः त्रिकोणस्य-अष्टकुटस्य द्वारा व्यापारस्य स्थितिः आपणमूल्यं इत्यादीनां बोधो जायते ।

(१३) शब्दोत्पत्तिशास्त्रम्( Derivation ):

ज्योतिषशास्त्रे खगोलमंगीकृत्य मुख्यतया आकाशतत्त्व द्वारा शब्दोत्पत्तिः प्रदर्शिता वर्तते । पाणिनीय व्याकरणे पि शब्दोत्पत्ति विषये सिद्धान्तकौमुद्यां प्रथमे संज्ञा प्रकरणे कथितं यत् -

'नृत्तावसाने नटराजराजो ननाद ढक्कां नवपंच(१४) वारम् ।
उद्धर्तुकामः सनकादि सिद्धानेतद् विमर्शे शिवसूत्रजालम् ।।इति ।

(१४) गृहविज्ञानम् : (Domestic Science ):

ज्योतिषशास्त्रे स्त्रीताकाध्याये अस्य विज्ञानस्य वर्णनं वर्तते । यद् मानवजीवन कृते मुख्यं अस्ति । ज्योतिषशास्त्रे स्त्रीजातकविषये सुचारु वर्णनं अस्ति । धर्मशास्त्रेषु अपि कथितं वर्तते यत् 'यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः' । तथा च '-न-गृहं-

'न गृहं गृहमित्याहुः गृहिणी गृहमुच्यते ।
गृहं तु गृहिणीहीनं, कान्तारादति रिच्यते ।।इति ।

तथा च 'मातृदेवो भव', जननी जन्मभूमिश्च स्वर्गादपि गरीयसी', इत्यादि सुवर्णसदृशेषु सुचारु वाक्येषु संसारे स्मिन् स्त्रीणां मुख्यं स्थानं प्रतिपादितं वर्तते ।

स्त्रीणां मुख्यतया चत्वारि रूपाणि सन्ति यथा- माता-भगिनी-पत्नी-पुत्रीश्चौती स्त्रीधर्मेषु मुख्यतया बालानां संस्कार विवयत्वे, गृहव्यवस्था कुटुम्बस्य पालनं पोषणंच, आहारव्यवहार सदाचारादीनां कार्यं धर्मशास्त्र मुख्यं वर्तते । तस्मादेव कारणात् श्रीमदधिजगद्गुरुणा श्री शंकराचार्येणापि वर्णितं यत् -" कुपौत्रो जायते क्वचिदपि कुमाता न भवति" इति ।

आंग्लभाषायामपि केनापि कविनोक्तं यत्

ज्योतिषशास्त्रे कथितं यत् स्त्रीया: प्रथम मासिक स्रावस्य प्रथम दिवसादारम्य क तस्या: भविष्यं निश्चियते । (मुहूर्त मार्तण्ड अ०२ श्लोक१) अनया रीत्या संसारे स्मिन् स्त्रीणां महत्वपूर्णं स्थानं वर्तते । तथा च सृष्टिकालादारम्य अद्यदिन पर्यन्तं अर्थात् वर्तमाने समये पि तासां पूजनं भवति यथा नवरात्रि महोत्सवे महादेव्या: पूजनमर्चनं भवति ।

स्व० हर्बर्ट स्पैन्सर महाभागेन हिन्दुलग्न संस्थां तथा च दाम्पत्यधर्मं विषयीकृत्य पुरुषवर्ग द्वारा स्त्रीजातीनां प्रतिष्ठा प्रतिष्ठाया: निरीक्षणं तथा च परीक्षणं कृत्वा संस्कृतस्य यथार्थ स्वरूपस्य वर्णनं कृतं भवति । (हिरण्यगर्भ हिन्दु प्रकरणं अ०६)

(१५) अर्थशास्त्र( ECONOMICS )

ज्योतिषशास्त्रे अर्थशास्त्रं माहात्म्यं भजते । लग्नादि द्वादश भावेभ्य: दश-एकादश भाव: निश्चीयन्ते ।

(१६) ज्ञानशास्त्र( EPISTEMOLOGY )

ज्योतिषशास्त्रस्य खगोल मुख्यप्रमाणं वर्तते । तथा च भास्कराचार्य द्वारा इदं सिद्धान्तप्रशंसाया प्रतिपादितं वर्तते ।

(१७) नीतिविज्ञानशास्त्रं( ETHICS )

इदं शास्त्रं अपि विज्ञानत्वेन स्वीकृतं । तस्मिन् शास्त्रे देशस्य संस्कृतेः सन्मानं वर्तते ।

यदा शुभग्रहाः भाग्यस्थानेषु अथवा केन्द्रस्थानेषु वर्तंते तदा तस्य जनस्य नीति-विशयकुस्य-बुद्धिविषयकस्य प्रमाणं विशेषरूपेण सिद्धं भवति ।

(१८) मानववंशविज्ञानशास्त्रं( ETHNOLOGY )

प्रत्येक मनुष्यः आत्मनः वंशविस्तारकर्तुं लग्नादिकं कृत्वा वंशवृद्धिम् करोति । अथ वर्तमानकाले अयं विषयः बहुवचयियुक्तः वर्तते ।

विश्वोत्पत्त्याः निर्णये तथा च नैतिक व्यवस्थायाः उपपत्तैः निर्णयप्रसंगो भारतीय संस्कृत्यां ब्रह्म-माया पुरुष-प्रकृतिः शिव-शक्तिः शची-पुरन्दरः, सीताराम, अर्थात् अस्य स्वरूपस्य देहभिन्नतायाः सर्वथा लोपः अभवत् ।

एकेन कविना उक्तं यत्-सार्धे केन च कस्यार्धे शिवयो समरूपिणो ज्ञातुं न शक्यते लग्नं-------

(हिन्दुलग्नसंस्था तथा च दाम्पत्यधर्मः पृष्ठ क्र०१८१) मनुस्मृतावपि कथ-कथितं वर्तते यत् -

'द्विधा कृत्वाऽत्मनोदेहे धर्मेण पुरुषो भवत् ।

अर्धेन ~~कृत्वा-स-~~ नारी तस्यां स विराजमसृजत्प्रभुः ।।' इति ।

(मनु० अ०४-श्लोक ४५)यो भर्ता सा स्मृतांगना इति ।ख्रिस्ती सम्प्रदाये पि इति कथितं ।

(१८) सुप्रजननशास्त्रं-सुसन्ततिशास्त्र-

कामन्दकीनां स्त्रीणां विरक्ततायाः अनुरक्तायाश्च परीक्षा करणीया ।

विरक्ता-अनुरक्तायाः स्त्रीयाः लक्षणं, स्त्रीणां गुणाः, विनाशकारणं, रजस्वला-धर्माः, स्त्रीप्रशंसा, मैथुनकाल नियमः इत्यादिकं अस्मिन् शास्त्रे विस्तरेण कथितं ।

(१९) रत्नविज्ञानशास्त्रं :

उत्पत्तिः बलसंज्ञक दानव द्वारा । दधिचेः अस्थना द्वारा । पृथिव्याः गुणास्वभाव द्वारा ।

प्रकाराः- पृथिज, वनस्पतिज, खनिज-उपलज, मृत्स्नः सौगन्ध्यम्, उपलस्यवर्णः,जलज, प्राणिजाः । मूल्यः आकर्षणं- प्राकृतिकं-कृत्रिमंच ।

(२०) रेखागणित शास्त्रं (EUCLID )

गोलियम् त्रिकोणमिति भूमितिः

म०म०श्री भास्कराचार्येण, तथा, म०म०श्री नीलाम्बर इते महाभागेन तथा च म०म० श्री सुधाकर द्विवेदी महोदयेन स्व-स्वग्रन्थे वर्णितं वर्तते यत् खगोले ग्रहाः तारकाणि-नक्षत्राणि स्वकक्षायां स्थित्वा बहुना प्रकाराणां आकृतिवां-सदृढरेखानां-त्रिकोणस्य-समचतुष्कस्य-षट्कोणस्य रचनाः कुर्वन्ति । तथा च तेषां अन्तरेण ग्रहाणां दृष्टिः, योगस्थितिः निश्चित्य फलादेशस्य निश्चयः क्रियते ।

(२१) भूगर्भशास्त्रं-खनिजविद्याः

ज्योतिषशास्त्रस्य नियमानुसारेण यस्य जातकस्य जन्म पादेन संभवति तथा च मंगलग्रहस्य स्थितिः सुष्टु स्यात् तदा सः जातकः अस्मिन् विषये जिज्ञासुः भवति। तथा च ज्ञाता भवति ।

वर्तमान काले खनिज पदार्थानां, तैलस्य, वायोः, जलस्य इत्यादीनां महत्वपूर्णानां प्रश्नानां निराकरणं बृहत्संहितायां वर्णितं वर्तते ।

(२२) रसायनशास्त्रं( CHEMISTRY )

सूर्यस्य किरणेषु सप्तवर्णाः सन्ति । आंगलभाषायां सः 'विब्ज्योर' (VIBGYOR ) इति नाम्ना प्रसिद्धं । सूर्य किरणानि प्रतिदिनं मानवेभ्यः अनेक प्रकाराणां तत्वानां प्रदानं कुर्वन्ति । तेषु समग्रेषु जीवतत्वेषु सविशेषं प्राणवायुः प्रकाशः तथा च जीवतत्वः 'डी' वर्तन्ते । वसन्तादि ऋतूणां कर्ता कारणंच सूर्यः एव । तेषु प्रायः अन्नै, वनस्पतिषु वर्षा द्वारा प्रतिदिन भिन्नभिन्न तत्वानां प्रदान करोति । इदं वस्तु वर्तमानकालेन वैज्ञानिकानां कृते संशोधन विषये अतीव महत्वपूर्णः विषयः वर्तते ।

(२३) तर्कशास्त्रम्।न्यायशास्त्रम्( LOGIC )

मानवस्य साहजिक मनसि दोषसंभवस्य निराकरणं निवारणंच अस्याः शास्त्रपद्धति द्वारा प्रतिपादितं भवति । अस्य शास्त्रस्य अनुसरणेन दोषरहिता विचारणा, तर्केण अनुमानेन च लभ्यते । शास्त्राभ्यासे द्वारा जनेन सत्यासत्यस्य विचारणायाः सम्यक् बोधः जायते तथा च तस्याः विचारणायाः सम्यक् बोधस्य अभिनवा पद्धतिः बोधो भवति । तस्मिन् स्थाने विचारः विचारणा शब्दौ विस्तृतार्थेन व्यवह्रियेते । तस्य तर्कशास्त्रस्य मुख्यतया निम्नलिखितानि अंगानि सन्ति यथा स्मरणशक्तिः, अनुमानम्, आधारः, प्रमाणविधानम् वैकल्पिक विधानम् वृद्धिः, सरलीकरणम् नियमविधानम्, पृथक्करणम् फलितविधानम्, पूर्वसत्यं-उत्तरसत्यं तर्क प्रामाण्यम् तस्य साम्यता, अर्थात् तस्मिन्नापि स्थाने प्रत्यक्षरीत्या- परोक्षरीत्या च अनुभूयते । ज्योतिषशास्त्रस्य अभ्यासे तथा च तस्य शास्त्रीयेषु ग्रंथेषु खगोल विज्ञानमाधारीकृत्य मुख्यैः प्रकारैः सत्यं सिद्ध भवति ।

अक्षपादगौतमः महान् तपस्वी ऋषिः आसीत् । तेन मुनिना अस्य न्याय-शास्त्रस्य रचना कृता आसीत् । अस्याः विद्यायाः प्रशंसा निम्नरूपेण वर्तते । यथा-

प्रदीपः सर्वविद्यानामुपायः सर्वकर्मणाम् ।
आश्रयः सर्वधर्माणाम् सश्वदान्वीक्षिकीमता ।। इति ।

अर्थात्- इयं विद्या सर्वदा संपूर्णानां विद्यानां ज्योतिस्वरूपा, सर्वेषां कर्मणां उपायरूपा तथा च सर्वेषां धर्माणां आश्रयरूपा वर्तते ।

कार्य-कारणभावस्य , दुःखस्य कारणं जन्म, जन्मकारणं प्रवृत्तिः, धर्माधर्मस्य नाशः, मृत्युः, प्रवृत्तेः कारणं रागद्वेषौ, दोषस्य कारणं मिथ्याज्ञानं, अविद्या, दुःखस्य निवृत्तिकारणं मोक्षः अनया रीत्या प्रतिपादितं वर्तते ।

न्यायभाष्यकारः कथयति यत्-"तद् अभयं, अजरं अमृत्युपदं ब्रह्मक्षेमप्राप्तिरिति।"

अनेन प्रकारेण चतुर्विध पुरुषार्थस्य मूलरूपः मोक्षः एव न्यायशास्त्रस्य सिद्धान्तः अस्ति ।

(२४) मूर्तिशास्त्रम् (ICNOGRAPHY )

ज्योतिषशास्त्रे श्री वराहमिहिर कृत बृहत्संहितानाम ग्रन्थे ५८ तमे प्रतिमालक्षणाध्याये परमाणुप्रमाणं, प्रतिमानिर्माण प्रकारः, वशिष्ट नग्नजितयोः आचार्ययोः मतानि, प्रतिमास्वरूपदर्शनम् विशेषलक्षणम् सपरिवारं विष्णुपंचायतनम् बुद्धस्य प्रतिमा, जिनप्रतिमा इत्येतेषां वर्णनम् समानप्रमाणं वर्णितमस्ति ।

प्रतिमा पार्थिवसुवर्णरजतताम्रकांस्य पंचधातुरत्नैः म्यः तथा च रक्तश्याम-श्वेतादि वर्णेभ्यः उपलभ्यः निर्मीयते । सांसारिक सुखप्राप्त्यर्थं प्रत्येक मनुष्यः स्वकुलधर्मा-नुसारेण तथा च ज्योतिषशास्त्रस्य नियमानुसारेण देवानां-देवीनांच भक्तिः, दर्शनम् पूजनमर्चनंच करोति । तथा च अवश्यं शान्ति प्राप्नोति । कुतः ज्योतिषशास्त्रे मानवानुकुल, प्रतिकुलस्य देवानां-देवीनांच भक्तिविचारः वर्णितः ।

मूर्तीनां स्वरूपदर्शन-आकर्षणं प्रभावैश्च च जनैः अवश्यं आत्मनः पुरुषार्थं सहायकर्ता भवति । कुतः प्रतिमायाः स्वरूपे तथा च तस्याः धातोः किरणेभ्यः मानवस्य ज्ञानेन्द्रियाणि कर्मेन्द्रियाणि, मनः आत्मा च प्रसीदन्ति । तथा च अलौकिक भावनायाः अनुभवः प्रजायते । अथ च विशेषशक्तिः सिंचनं भवति । इति निर्विवाद सत्यं ।

(२५) दर्शनशास्त्रम् ( PHILOSOPHY )

सत्यतत्वस्य दर्शनं येन सिद्धं-भवति तदेव दर्शनं कथ्यते । दर्शने दुःखस्य नाशः तथा च सुखस्य प्राप्तिः इति द्वाभ्यां लक्षणाभ्यां ज्योतिषशास्त्रे होराशास्त्रस्योत्पत्तिः संभूता । मानवजीवने सुखदुःखस्य भावना होराशास्त्र द्वारा शुभाशुभफल प्राप्त्यर्थं ग्रहयोगानुसारेण तस्याः गणना कृता आसीत् । भगवदभिः पराशर, जैमिनि आर्यभट्ट वराहमिरादिभिः ऋषि प्रभृतिः आचार्यैः लोककल्याणाय ज्योतिषशास्त्रस्य सिद्धांताः संहितानुसार रूप होराशास्त्रस्य ग्रंथानां रचनाः कृताः वर्तन्ते ।

ज्योतिष दर्शने (१)प्रकृतिः(२) बुद्धिः(३) अहंकारः(४)पंचकर्मेन्द्रियाणि (५) पंच ज्ञानेन्द्रियाणि(६) मनः (७) पंचतत्वानि(८) आत्मा अथवा चैतन्यतत्वं इति तत्वानां नक्षत्राशिग्रहैः द्वारा प्रत्यक्ष-परोक्ष दर्शनं मनुष्येभ्यः कारितं ।

प्रकृत्याः जगतः सृष्टिः, निमित्तकारणं, जीवानां पापपुण्यानि, धर्माधर्माः, भोगः, कर्म, परिणामम् इत्यादि ज्योतिषशास्त्र दर्शन द्वारा, ईश्वरः सृष्टिकर्ता, रक्षकः प्रलयकर्ता, इति गुणैः सहितो रहितः अस्ति इति प्रतपादितं वर्तते ।अथातु मानवानां दुःखनाशस्य उपायः तदेव दर्शनम् ।

(२६) भाषाशास्त्रम्।भाषा विज्ञानम्( PHILOLOGY )

ज्योतिषशास्त्रे राशि-ग्रह-नक्षत्र द्रेष्काणादि वर्गैः द्वारा मानवशरीरस्य

मुख्य-मुख्य अवयवानां वर्णनं कृतं वर्तते । यस्मिन् वृषभराशेः द्वितीयस्थानं बुध-शुक्रादि-ग्रहेभ्यः, बुध-गुरु-शुक्राणां द्रेष्काणेन मनुष्यस्य मुखं, मुखेन संस्कारः, संस्कारेण भाषा इत्यादि ज्ञायते ।

सर्वार्थचिन्तामणि नाम ग्रन्थे(१) केन्द्रस्थाने बुधः, बलवान धनेशः शुभग्रहयुक्तः शुक्रः यदा द्वितीय स्थाने वा तृतीय स्थाने यदा स्यात् अथ च उच्चस्थानांकस्य स्यात् (२) द्वितीये चन्द्रः भौमः बुधे द्वारा दृष्टः, केन्द्रस्थाने सौम्यः(३) धनेशः गुरुःसंपूर्ण बलवान् स्यात् सूर्यशुक्रेण द्वारा दृष्टः(४) धनेशः सौम्यः, उच्चस्थानस्थितस्य शनिः गोपुरांशे स्थितः स्यात् अथवा गुरुः सिंहस्थानांशे स्यात् इत्यादि योगाः भाषा-शास्त्रज्ञाः तथा च विद्वांसः कुर्वन्ति ।

व्याकरणशास्त्रे सिद्धान्त कौमुद्यां अपि ईदृशं वर्णनं वर्तते यत् 'अकुह विसर्जनीयानां कण्ठः' अर्थात् अ, क, ख, ग, घ, ङ, ह एतेषां कण्ठस्थानं वर्तते । 'इचुयशानां तालु' अर्थात् इ, च, छ, ज, झ, एतेषां तालुस्थानं, 'ऋटुरषाणां मूर्धा', ऋ,ट,ठ,ड,ढ, ण एतेषां मूर्धास्थाने ,'लृतुलसानां दन्ताः-' लृ, त, थ,द,ध,न, एतेषां दन्तस्थाने, 'उपूपध्मानीयानामोष्ठौ-' अर्थात् उ,प,फ,ब, भ, म तथा च उपध्मानीयवर्णानां ओष्ठस्थानं वर्तते, 'यमङणनानां नासिका च' अर्थात् य,म,ङ,ण, न एतेषां नासिकास्थानं, 'एदैतोः कण्ठतालु' अथा ए,ऐ, ओ एतेषां कण्ठताम् स्थाने, ओदौतोः कण्ठोष्ठम अर्थात् ओ-औ-कण्ठ-ओष्ठस्थाने, वकारस्य दन्त्योष्ठम् स्थानं वर्तते ।

(२७)मनोविज्ञानम्:( PSYCHOLOGY )

'चन्द्रमामनः' इति वेदवाक्यं अधिकृत्य चन्द्रः मनः प्राणश्च अस्ति । फलदीपिका नाम्नः ग्रन्थे चन्द्रमसः द्वादशवस्था-चन्द्रक्रिया चन्द्रवलाद्वारा मनःस्थितेः वर्णनं वर्तते । चन्द्रराश्यानुसारेण जातकस्य नामकरणस्य कारणं अपि चन्द्र एव वर्तते ।

मानसचिकित्सिकैः अपि खगोल विज्ञानमाधारीकृत्य ज्योतिषशास्त्रं विज्ञान एव अस्ति इति स्वीकृत्य मनोविज्ञानस्य एकः भागः स्वीकृतः ।

(२८) संगीतशास्त्रम् :

ज्योतिषशास्त्रे रागस्य समयः (कालः), रागद्वारा निवृत्तिः प्रत्येक ऋतुमनुसृत्य राग,ताल,संगीतम्, मल्हारराग द्वारा वर्षागमनं इत्यादीनां वर्णनं सम्मिलति । राशी चक्र द्वारा तथा ग्रहदशा द्वारा अपि रागानां निश्चयः क्रीयते । संगीतशास्त्रे संगीतस्य, तंतुवाद्यस्य, नृत्यस्य, नाटकस्य इति संगीतकलायाः प्रभुता विभागाः सन्ति । 'मालविकाग्निमित्रम्' नाम नाटके संगीतनाट्यनृत्यान् देवानां यज्ञरूपेण कथितान वर्तते ।

(२९) अध्यात्मशास्त्रम् :( METAPHYSICS )

अथवा आध्यात्मिक भावना शास्त्रम्( SPIRITUAL SPIRIT. ) भारतीयसर्वशास्त्राणां कर्ता, सर्वासां विद्यानाम् गुरुः बृहत्पवि वर्तते । यस्य मूलभूतः सिद्धान्तः आध्यात्मिक शास्त्रं योगशास्त्रं वा वर्तते । अस्मिन् शास्त्रे श्रीमद्भगवद्गीतायाः उपदेशः 'कर्मण्येवाधिकारस्ते मा फलेषु कदाचन' प्रतिपादितः अस्ति ।

(३०) पदार्थविज्ञानम्( PHYSICS )

अस्मिन् ब्रह्माण्डे कालपश्चात् अपरं द्वितीयं तत्वं पदार्थविज्ञान वर्तते । यस्य मूलभूतो सिद्धान्तः गुरुत्वाकर्षणं अस्ति । खगोलविज्ञानस्य तेजसगोलक पदार्थैः द्वारा श्री भास्कराचार्येण स्वस्य सिद्धान्त शिरोमणि' नाम ग्रन्थे आकृष्ट-शक्तिश्च महीतयायत् ।

इति तारामण्डलं, नक्षत्रमण्डलं, आकाशगंगा, निहारिका, ग्रहमण्डलम् इंत्यैतेषां संचारस्य ज्ञानप्रकरणे अपि ग्रहाणांगतिः, स्थितिः उपरि मनुष्यजीवनस्य

जड-चैतन्य पदार्थानाम् विकृतय: प्राकृत -कृत्रिम पदार्थानां विकृतय:, पशुपक्षिणां, जीवजन्त्वादिनां, यन्त्रयुगस्य प्रधानरूपेण कृत्रिमोपग्रहाणां तथा 'रॉकेट' यानस्य जलसमुद्रयन्त्राणां स्थलवरयन्त्राणां इत्यादीनां सर्वेषां पदार्थानां आधार: गुरुत्वाकर्षणस्य नियमोपरि आधारित: इति प्रतिपादितम् । अतएव 'सर्वं ज्योतिर्मयं जगत्' इति सूत्रं स्वयमेव सिद्ध भवति । यस्मिन् गणितक्रियाप्रतिपादितानि ग्रहाणांगतय:, स्थितय: वक्रीमार्गीणां उदय:, अस्त: इत्यादीनि सन्ति ।

सूर्य सिद्धान्ते पृष्ठ-५३ अध्याय:२ श्लोक: ६ त: १२ ग्रहाकर्षणमूलभूते ग्रहाणां अष्टधा गति: वर्णिता वर्तते । यथा-

वक्राऽतिवक्रा विकला मन्दा मन्दतरा समा ।
तथा शीघ्रतरा शीघ्रा ग्रहाणां अष्टधा गति: ।।
ग्रहगतीनां अष्ट विधत्वे पि वैशिष्ट्य माह-
तत्रातिशीघ्रा शीघ्राख्या मन्दा मन्दतरा समा ।
ऋज्वीति पंचधा ज्ञेया या वक्रासाति वक्रगा ।। इति ।

सिद्धान्तशेखरे-

मीनाजायैरतिशयचला गोध्नदैश्च शीघ्रा,
कैन्द्रे मिथुनमकरादौ तु नैसर्गिकी स्यात् ।
कर्काधर्धे भवति धनुषश्चान्त्य खण्डे ति मन्दा,
चापाधर्धे कुहिरशकले न्त्ये च मन्दा प्रतिष्टा ।।

धीवृद्धिदे ग्रन्थे-

मध्यस्फुटान्तरदलेन चलात् समेतान्
मध्ये स्फुटात् समधिके सति चान्ययोनात् ।
स्पष्टं ज्यजेत् कृत्रण ष्टसु तत्र भेषु
वक्रातिवक्रकुटिला गतयो भवन्ति ।

वस्तुत: ग्रहा: स्वस्व गोले स्वस्वकक्षायां क्रमगता: एव भवन्ति, परन्तु समय-स्थल दिशादिनां संयोगविशेषै भूवासिनां ग्रहगतिका विविधा प्रतिभान्तीति । नव्यमतानुसारं भूवश्चलने स्वीकृते भूवश्चलने स्वीकृते भूसूर्ययोर्मध्ये शशांकशुक्रबुधानां कक्षा: भवन्ति । उपरिष्टात् कुजेज्यार्कि नक्षत्राणां कक्षा: भवन्ति । तत्र तावच्चन्द्रस्य भुवं परितो भ्रमणत्वात् तस्य वक्रा गतिर्न । भूसूर्यान्तर्गतयोर्बुधशुक्रयो: सूर्यं परितो भ्रमणावशात् भूवासिनां कदाचित् तयोर्वक्रागतिर्दृष्टिपथमारोहतीति तावद्-बुध व क्रागमि: प्रदर्श्यते ।

संहितादि ग्रन्थेषु पदार्थविज्ञानस्य नियमा: प्रकृत्या सगोलविज्ञाने आधारभूता: सन्ति । तेषु आदित्य चतुर्धा अयनपरीक्षाणम्, विकारयुक्त: सूर्य: सूर्यरश्मीविशफलं प्रतिसूर्यफलं ।

चन्द्रमा: अपि चतुर्धा- शुक्लाशुक्लनिर्णय:, नक्षत्रसंयोग:, चन्द्रमस: दशविधम् संस्थानफलं , चन्द्रसमागम फलम् ।

| | |
|---|---|
| भौमस्य अपि चतुर्विधा- | उष्णामश्रुमुखं व्यालं रुधिराननमेव च, |
| पंचमुखसंचारवशफलम्-वर्णफलं | निस्त्रिंशं मुशलं चैति पंचवक्राणि भूसुते । |

बुधस्य अपि चतुर्विधागति:- उदयफलं, नक्षत्रशफलम्, पराशरोक्ता सप्तधागति:, प्राकृत, विमिश्र, संक्षिप्तं, तीक्ष्णं, योगान्तिकं, घोरं, पापफलम् उदयास्त फलम् ।

बृहस्पतेरपि चतुर्विधा- द्वादशनामानि-फलम्, नक्षत्रशफलम् संवत्सरानयनम् अंगविभाग सहित फलम् ।

शुक्रस्य चतुर्विधा- नागादि नवविधि, उत्तर-मध्य-दक्षिणमार्गा:, षड्मंगलानि। शनैश्चरस्य चतुर्विधा- नक्षत्रशफलम्- रोहिणी शकट भेद: ।

अगस्त्यस्य चतुर्विधत्वं- उदयप्रभाव:, वर्णलक्षणं, शुभाशुभउदयास्तलक्षणं, सप्तर्षीणां चातुर्विधत्वं-दिक्संस्थान लक्षण, नक्षत्रभोगप्रमाणं, शुभाशुभम् ।
कूर्मविभाग:- पूर्वदिशादि नामानि ।
नक्षत्रव्यूह: नक्षत्रगतपदार्था: ।
ग्रहयुद्धं- कारणं- प्रकाराणि युद्धे पराजय: -विजय: चन्द्रसमागम:, चन्द्रवर्षम् ।
ग्रहसंवर्त:, ग्रहसमागम:, ग्रहसम्मोह:, ग्रहसमाज:, ग्रहसन्निपातं, ग्रहकोश: ।पदार्थ विज्ञान विषये वर्तमान समये - ऐस्ट्रो फजि क्स विषये बहव: ग्रन्था: लब्धुं शक्यन्ते-यत् ज्योतिषशास्त्रं विज्ञानं एव इति विज्ञानत्वेन स्वीकुर्वन्ति । 'एस्ट्रोफिजिक्स' (ज्योतिष-पदार्थ विज्ञान) विषये ब्रह्माण्डे ये ये विकृतय: भवन्ति ता: ता: ग्रहस्थित्यानुसारेण भवन्ति । अथ च पृथिव्यायुपरि मानवजीवनोपरि तस्या: प्रभाव: मुख्यत्वेन वर्तते ।

वायुमण्डल विद्या:(METEOROLOGY )

ज्योतिषशास्त्रे वायूनां निम्नांकिता भेदा: प्रदर्शिता: सन्ति । यथा (१) रूक्ष:(२) भूमु:(३) चण्ड:(४)प्रचण्ड: एते चत्वारो भेदा सन्ति ।

तदन्यभेदा:(१)आवह:(२)प्रवह:(३)संवह:(४)विवह:(५)उद्वह:(६)अतिवह: (७) प्राणवह: इत्येते वायो: सप्तभेदा: सन्ति ।

मतान्तरे पि वायो: भेदा: सन्ति-(१) भू वायु(२)आवह: (३) प्रवह: (४) उद्वह: (५) संवह: (६) सुवह: (७) परावहश्चेति ।

सिद्धान्त शिरोमणौ तु (१) आवह: (२) प्रवह: (३) उद्वह: (४) संवह:(५)सुवह (६) परिवह: (७) परावहश्चेति सप्तभेदा: स्यु: ।

अथ शरीरस्था: प्राणादय: पंचवायव: तथा च तेषा क्रियाश्च यथा - (१) प्राण:(हृदि) (२) अन्नप्रवेशनम् (२)अपान:(गुदे)मूत्राद्युत्सर्ग: (३) समान: नाभीमण्डले-अन्नादि पचनम् (४) उदान(कण्ठदेशे)-अन्नादि पचनम्(४) उदान: (कण्ठदेशे-भाषणादि) (५) व्यान:(सर्वशरीरग:)निमेषादि।इत्येते । शरीरस्थावायो: पंचभेदास्तत्क्रियाश्च ।

अथ तस्य कृकरादयः पंचभेदास्तत्क्रियायाश्च यथा(१) कृकरः(क्षुत्कर)(२)देवदत्तः (जृम्भणाकरः) (३) नागः(उद्गारकरः) (४) कूर्मः(उन्मिलनैनिमिलनकृ)(५) धनंजयः (पोषणाकरः) इति ।

तस्य कृकरादयः सक्रियाः पंचभेदाः स्युः ।

| | |
|---|---|
| शिशिरऋतुजवायुः | शैशिरः । |
| वसन्त ऋतुजवायुः | वासन्तः । |
| ग्रीष्म ऋतुजवायुः | ग्रैष्मः । |
| वर्षाऋतुजवायुः | प्रावृषिजः । |
| शरद् ऋतुजवायुः | शारदः |
| हेमन्तऋतुजवायुः | हैमन्तः । |

अषाढ मासस्य शुक्लपक्षस्य पौर्णमास्यां- पूर्व समुद्र वायुः । शरद-वसन्तौ। शुभम अषाढ़ शुक्लस्य पौर्णमास्यां अग्नौः दौर्भिक्ष्यं, अग्निभयं ।अषाढ़ शुक्लस्य पौर्णमास्यां दक्षिणे- अल्पवृष्टिः ।

आषाढ़ शुक्ल पौर्णमास्यां- नैऋत्यां अतिदौर्भिक्ष्यं

आषाढ़ शुक्ल पौर्णमास्या- पश्चिमे- युद्धभयम् ।

आषाढ़ शुक्ल पौर्णमास्यां वायव्यां- सुखदा वर्षा

आषाढ़ शुक्ल पौर्णमास्यां- उत्तरे- जलेन परिपूर्ण वर्षा

आषाढ़ शुक्ल पौर्णमास्यां ईशाने- धान्यपरिपूर्णयुक्त वर्षा, शुभफलम् । एते भेदाः सूर्याचन्द्रमसोः तथा च ग्रहाणांस्थितिगतियुतिषूपरि अवलंबितः । एतं विषयीकृत्य अस्माकं ऋत्वामान विभागः प्रतिदिनस्य उष्णतामानस्य,समुद्रे आगतानां गम्भीर तरंगानां- तथा च जलराशेः न्यूनतादि(और)विषयाणां पूर्वानुमानं कुर्वन्ति ।

पद्धतिशास्त्र-(विधिविज्ञानम्) (METHODOLOGY)

सत्संग:, विद्वज्जनामतानि पुस्तकालय-प्रमाणमानं- ब्रह्मवाक्यं जनार्दनम् `, अभ्यास प्रयोग: अनुभव: चिन्तन-मनन इत्येतेषां समावेशो भवति ।

दन्तविज्ञानम्(ODONTOLOGY)

यस्य जातकस्य प्रथमं उर्ध्वभागे दन्ता: आयाति अथवा जातक: सदन्त: जन्म धारयति अथ च २,३,४,५ तमे मासे दन्ता: उत्पन्न: भवेयु: तदा तस्य कुटुम्बे मातापित्रो: तथा च आत्मन: अनेके रोगा:, हानि: आर्थिकाविपत्ति: , सामाजिकभयम् इत्यादि दु:ख-जनकानां प्रसंगानां अनुभव करोति । अष्टममास पश्चात् दन्तागमनं शुभकारकं वर्तते ।

अथ च प्रथमे उपरिभागे दन्तानं दर्शनं भवे तथा च सदन्त जन्म यदा स्यात् तदा धर्मसिन्धु ग्रंथे तृतीय परिच्छेदे (पृ०सं० ३६४) वर्णिता शान्ति: कार्या। तस्मिन् स्थाने रूद्रयामल नाम ग्रन्थे ससन्दर्भा वर्णिता:। अस्यां शान्त्याम् धाता-अग्नि: सोम: वायु: भूमि: एतेषां तथा च भगवत: केशवस्य पूजनं, ग्रहपूजनं होमंम्र इत्यादीनां विधि: प्रदर्शितो वर्तते । षष्ठे वा अष्टमे मासे यदा दन्तानां आगमनं भवेत् तदा बृहस्पति पूजनं कार्यं-शुभफलदायकं भवामि ।

अथ प्रथमादिमासेषु बालकानां दन्तजनन फल बोधक चक्रम् ।

| | | | | | |
|---|---|---|---|---|---|
| १ मास: स्वयंनाश: | २ मास: भ्रातृनाश: (कनिष्ठनाश:) | ३ मास: भगिनीनाश: | ४ मास: मातृनाश: | ५ मास: ज्येष्ठा (भ्रातृनाश:) | ६ मास: सुभोगम् |
| ७ मास: तातत्सुखम् | ८ मास: पुष्टता | ९ मास: लक्ष्मी: | १०मास: सौख्यम् | ११मास: सौख्यम् | १२ मास: धनसंपत्ति |

धर्मशास्त्रम्। धाराशास्त्रम् :

धर्मशास्त्रस्य मूलभूत सिद्धान्त ग्रंथेषु मनुदेवल्याज्ञवल्क्यादि स्मृतिग्रंथा:, निर्णयसिन्धु:, धर्मसिन्धु:, कालमाधव:, व्यवहारमयुख:, वीरमित्रोदय:, षडशीति, गौतमधर्मसूत्रम् इत्यादि ग्रंथा: वर्तमान समये पि प्रचलन्ति ।

मनुस्मृतौ धर्मलक्षणं अध्याय २।१२ तमे कथितं यत् -

वेद: स्मृति: सदाचार: स्वस्थ च प्रियमात्मन: ।
एतच्चतुर्विधं प्राहु: साक्षात् धर्मस्य लक्षणम् ।।

धर्माधर्मयो: व्याख्या निम्नप्रकारेण वर्तते ।

धर्मो बाधते धर्मों न स धर्म: कुधर्म तत् ।
अविरोधि तु यो धर्म: स धर्म सत्य विक्रम: ।।

अनेन प्रकारेण धर्मशास्त्रं मानवसंसारे निक्षिप्तं अस्ति । तस्मिन् जन्मत: आरभ्य मृत्युपर्यन्तं संस्कार कथनम्, कालनिर्णय:, यथासमयव्रतकार्यं निर्णय:, श्राद्धनिर्णय:, व्यवहार व्यवस्था, वर्षक्रियाकौमुदी, कालगणना इत्यादीनां विषयानां सम्बंध: प्रतिष्ठापित: वर्तते ।

विवादताण्डवग्रन्थे राजधर्म, राजनीति, व्यवहार:, वादक्रम:, प्रत्युत्तरस्य प्रकारा:, पुनर्वादि:, शिक्षा दण्ड:, न्याय: वादी प्रतिवादीनां विशेष ज्ञानम् । साक्षिण: लक्षणानि, लेखप्रमाणम्, सप्रमाण: भोग:, दिव्यगणना, दायभाग:, अविभाज्य धनम्, दत्तकविधानम्, संसृष्टि:, मायापोषणादि, स्त्रीधनम्, ऋणम्, आधिप्रकारा:, नियम:, भोगनिर्णय:, सेवक प्रकार नियमा:, पारिश्रमीकं, गृहभारकं, कालस्वरूपं, सीमाविवाद:, गृह-आपण-कृषि-स्थानम् चौत्रं वा, परस्पर हस्तादिनाताडन प्रसंगा:, आततायी लक्षणं, प्रकारा:, चौर:, स्त्री-पुरुषाणां धर्मा:, सकलन्यायदानम् एतेषां विषयानां वर्णनं अस्ति ।

स्वरशास्त्रम्।स्वरविज्ञानम्( PHONETICS )

प्रत्येक जनस्य नासिकायां द्वे विवरे भवत:। तस्मिन् दक्षिणायाः नासिकायाः विरात् दक्षिणस्वरः तथा च वामनासिकायाः विवरात् वामस्वरः उद्भवति । यदा औ स्वरौ सहितौ उद्भवेताम् तदा सुषुम्णानाम यः स्वरः कथ्यते ।

दक्षिणायाः नासिकायाः स्वरः शुक्लपक्षस्य ४,५,६,१०,११,१२ तिथौ, तथा च कृष्णपक्षस्य १,२,३,७,८,६,१३,१४,३० तिथौ उद्भवति । अनेन प्रकारेण वामस्वरस्योदयः शुक्लपक्षस्य १,२,३,७,८,६,१३,१४,१५ तथा च कृष्ण पक्षस्य ४,५,६,१०,११,१२ तिथौ सूर्योदयात् आरभ्यते ।
दक्षिणवामस्वरौ स्वाभाविकगत्यानुसारेण १ घण्टा =९०० श्वासाः तेषु २० क्षणानि पृथ्वि,१६ क्षणानि जलम्, १२ क्षणानि अग्निः, ८ क्षणानि वायुः ४ क्षणानि आकाशतत्वं तिष्ठति ।

| | | | |
|---|---|---|---|
| दक्षिणस्वरः | सूर्यः | पित्त | इडा |
| वामस्वरः | चन्द्रः | कफः | पिंगला |
| उभयस्वरौ | राहुः | वायु | सुषुम्णा |

अनेन प्रकारेण सूर्यादिग्रहाः षड्वर्गेन, पंचतत्वैः सह सम्बंधकर्ता वर्तते । तेषु मुख्यतया स्वरपरिवर्तनस्य, दक्षिणवामस्वरकार्यं, कार्यभाग्यस्वरः, आपक्षिवना, मृत्युज्ञानम्, स्वरद्वारा औषधज्ञानम्, स्वरानुसारेण जयपरा जयादि प्रश्नोत्तराणि, जन्मतः आरभ्य मृत्युपर्यन्तं प्रत्येकप्रश्नानां विचारः कृतो वर्तते ।

ज्योतिषशास्त्रे समरसारम्, प्रश्नग्रंथसंग्रहः, जातकादि ग्रंथे नरपतिजयचर्चादि ग्रंथानां परिचयः प्रदत्तः ।

<u>सामुद्रिकशास्त्रम् :</u>

बृहत्संहितायां पुरुषलक्षणाध्याय: अध्याय: ६८

उन्मानमानगतिसंहतिसारवर्णं,
स्नेहस्वर प्रकृतिसत्वमनूकमादौ ।
क्षेत्रं मृजां च विधिवत् कुशलोऽवलोक्य:,
सामुद्रविद् वदति यातमनागतं वा ।।

उन्मानं(उच्चमानं) मानं(प्रमाणं) गति:, संहति: सारं, वर्ण:, स्नेह: स्वर: प्रकृति: सत्वम्, अनुकम्(जन्मान्तरगमनं) क्षेत्रं (शरीरवयवप्रकार) लक्षणं) मृजा(पंचमहाभूतमयीशरीर-छाया) इत्येतेषां सम्यक् ज्ञाता तथा च मनुष्याणां शुभाशुभफलवक्ता सामुद्रिकशास्त्रज्ञाता इति कथ्यते । मनुष्य शरीरे सप्तधावत: सन्ति- रस-रक्तम्-मांसम-मेद: अस्थि-मज्जा शुक्रम् अ०६८ श्लोक ९९ ।

अनूकं-पूर्वजन्म लक्षणम्- अ०६८ श्लोक १०३ त: १०८

मनुष्य प्रकृति लक्षणम्- अ०६८ श्लोक ११२

मुखम्, जीह्वा, तालु, ललाटं, ललाटरेखा, मस्तकं, चिबुकं दन्ता, औष्ठम्, कपोलम्, कर्णौ, नासिका, केशा:(भ्रू: श्मश्रू: इत्यादि) जत्रु, ग्रीवा, बाहू, हस्तौ, अंगुलानि, मणिबन्ध, रेखा, चुचुकं(वक्षस्थलं) हृदयम् ।

पार्श्वम्, कक्षा उदरलक्षणम्, नाभिलक्षणम्, उदरवलयलक्षणम्, कटि, जठर, लक्षणम् स्फिक्लक्षणं, जानुलक्षणम् ।

जंघोरुलक्षणे, जंघारोमलक्षणम्, पादयो: शुभाशुभ लक्षणम् ।

लिंगलक्षणम्, वृषणलक्षणम्, मणिमूत्रलक्षणम्, वस्ति, शुक्र लक्षणे, मैथुनलक्षणं ।

चेष्टा, छिक्का, हसितं-रुदनं ।

छाया लक्षणं- पार्थिवा-जलजा-आग्नेया-वायवी, नाभसी छाया लक्षणं,पंचायतन देव-छाया लक्षणं । स्वर लक्षण, महापुरुषलक्षणानि अ०६८ श्लोक ८४ त: ८८

भाग्यवान् मनुष्य लक्षणम्- अ०६८

श्रान्तस्य यानमशनंच बुभुक्षितस्य पानंतृषापरिगतस्य भयेषु रक्षा ।

एतानि यस्य पुरुषस्य भवन्तिकाले धन्यं वदन्ति खलु ते नरलक्षणज्ञाः पंचमहापुरुष लक्षणानि-स्त्रीविशेषः ।

रोमरहित अवयवानि।नितम्ब-नाभि-स्तन ग्रीवा-अधर-दन्तपंक्तिः,वचन, नासिका-भ्रूः-ललाटे, कर्णौ-केशाः हस्तपादौ ।

अंगशास्त्रम् :

१) प्रयोजकमुपकारकं वा यथा ~~व्याप्ति~~ व्याप्तिरनुमित्यंगम् इत्यादौ । (सर्वदर्शन संग्रहः)

२) यस्मात् प्रत्ययविधिः तदादि प्रत्ययेऽङ्गम् इति शाब्दिकाः ।

३) मुख्य फलाजनकत्वे सति मुख्यफलजनक व्यापार जनकं अंगं इति मिमांसकाः। अत्र च कार्यकालवृत्तित्वेनैव कारणत्वस्य मिमांसकैः स्वीकृतत्वात् प्रयाजादि होमस्यापूर्व प्रत्येव जनकत्वेन मुख्यफल स्वर्ग प्रत्यजनकत्वमुपपद्यत इति ।

४) लग्नमिति मौहूर्तिकाः ।

५) शरीरावयवो ऽङ्गमिति काव्यज्ञाः वदन्ति ।

सामुद्रिकशास्त्रे अंगस्फुरणानुसारेण शुभाशुभफलं वर्णितं वर्तते । मस्तक स्फुरणे-भूमिलाभः। ललाटस्फुरणे स्थानलाभः । नेत्रस्फुरणे-धनप्राप्तिः । नेत्रकोणयोः स्फुरणे लक्ष्मीलाभः। नेत्रसमीपे स्फुरणे प्रियसमागमः । नेत्रपक्ष्मयोः स्फुरणे राज्यलाभः । नाभिस्फुरणे-सुखम् ।

इत्यादिना प्रत्येकेषां अवयवानां स्फुरणफलं प्रत्यादिष्टं वर्तते ।

सामुद्रिकशास्त्रे एव अंगशास्त्रस्य समावेशो भवति ।

कथितंच अन्ये शास्त्रे यत् पुरुषाणां ~~वैज्ञा~~ दक्षिणांगा दृढं वर्तते तथा च स्त्रीणां वामांग दृढं वर्तते इति अत्याधुनिकैः वैज्ञानिकैः प्रतिपादितं वर्तते -

MARCH' 1977- SCIENCE TO DAY

RIGHT: MALE, LEFT: FEMALE

The ancient Greeks believed that the position of the fetus(in the womb) determined its sex. A right -side location meant male and a left one, female. The concept of right and maleness and left and femaleness is to be found in various cultures. The Indian Palmists, for one, look at a woman's left hand and a man's right. The mythological Ardhanarisvara has the right-half of a man and left-half of a woman. Myths and mystics apart, scientists are now discovering a definite right-left orientation in sexes,according to an article in the New Scientist.

Dr.Ursula Mittwoch, Galton Laboratory, University College, London, and her colleague. Dr.David Kirk, compared the development of the right and left gonads(sex gland) in normal human fetuses. They weighed the gonads and estimated their protein and DNA contents. They found the right gonads were heavier than the left and contained more protein and DNA. Now, DNA is present in fixed amount in cells: and a greater quantity, therefore, implies a larger number of cells. This would mean, more cell divisions must have taken place in the right gonads. Generally, the testes contain more cells than the ovaries. This could imply that the right gonads have a greater potential of developing into testes. And the difference between the two sides was more marked in the ovaries than in the testes.

In normal human beings, when chromosomes determine the sex of the offspring, no lateralisation is noticed. But in hermaphrodites, the chromosomal mechanism usually breaks down. As a result, the person may have one ovary and one testis or one or two ovotestes. In hermaphrodites. Mittwoch found, the right gonads tended to become testes while the left ones tended to become ovaries. (In normal individuals the chromosomal control masks this tendency.)

In another study (of fingerprint ridges), it has been found tha the right hand has more ridges than the left and, in general, men's fingers have more ridges than women's. The difference here is attributed to chromosomes.

The Greeks thought that the side of the father or mother influenced the sex.(in case of the father, it was thought the right testis gave rise to males and the left to females. In the mother, the position in the womb was believed to affect the sex.) However, though these beliefs may not be true, the study suggests that the embryo itself shows a degree of lateralisation according to its sex.

<u>यंत्रमंत्रतन्त्र शास्त्रम् -</u>

उँ इति एव प्रथमं यन्त्रमन्त्रतन्त्र वर्तते । अयं मन्त्र: अक्षरपरमब्रह्मस्वरूपो वर्तते । अयं शब्द: अतीव रहस्यमय: वर्तते । अयमेव शब्द: आकृति:, अव्यक्ताव्यक्ताशक्तिस्वरूप:, ब्रह्माण्डस्य, ब्रह्मस्य प्रथम: शब्दोच्चार:, आकृति: साक्षात्कार: अस्ति । उँ इति प्रथमं प्रतिकं(चिन्ह) अस्ति । ध्वने:, शब्दस्य, आकाशस्य मूलत्वात् आरंभ: वर्तते, अनादि अनन्तं च । उँ इति शब्दे अकार:- जागृति:, उ स्वप्नस्थिति: तथा च म इति सुषुप्ति: इति वर्तन्ते । तुरीयावस्थायां उँकारस्य स्थानं वर्तते । उँकार: मूर्ध्नि विराजते । परमात्मा स्वरूपं बिन्दु प्रस्थाप्य ज्योतिस्वरूपब्रह्मण: प्राप्ति: भवति । उँकार मंत्रस्य उच्चार: मनसा वाचा कर्मणा आत्मन: देवता देवीनां विनयपूर्वक स्मरणाने प्रकर्तव्य: ।

ज्योतिषशास्त्रस्य नियमानुसारेण नवमस्थानात् पंचमस्थानात् गुरु: तथा च गुरो: पंचमस्थानात् विचार्य कै देवतानां देवीनांच यंत्रमंत्रतंत्राणां यथाविधिम् पूजनम चर्न जपतपादि करणेन कार्यसिद्धि: अवश्यं प्राप्यते । त्रिप्रकारेण जपस्य विधि वर्तते । (१) मानसिकी(२) वाचिकी- कायिका तथा च वर्तमाने कालेऽपि लेखनरूपजप अपि परिगणितं अस्ति ।

सांसारिक शान्त्यर्थं जपसंख्या ८ कोटि।८ लक्ष।८ सहस्र।अष्टशत।अष्ट।१२००।१०८।५४।३२।२१।११।३।१ इति प्रकारेण मंत्रजपकरणं श्रेयस्करं वर्तते ।

ज्योतिषशास्त्रस्य नियमानुसारेण जनै: सूर्यादि ग्रहाणां जपा:, मृत्युंजय महामन्त्र:, सर्वदेवगायत्री इत्यादिनां जपकर्माणि आत्मशान्त्यर्थं अवश्य कुर्यु: । मन्त्र, यंत्र, तन्त्रशास्त्रानुसारेण सिद्धं कृत्वा बीजमंत्रं, मुद्रा, आसनं, वस्त्रं, दिक्, काल:, माला(रूद्राक्ष-स्फाटिकादी), धूमं, दीपं, नैवेद्यं बलिप्रदानं इत्यादि पूजाया: नियमै: सिद्धिकरणे अभिष्टासिद्धि: प्राप्यते ।

साहित्यशास्त्रम् :

साहित्यदर्पणम्, काव्यप्रकाशः, काव्यालंकारः, ध्वन्यालोकः, चित्रमीमांसा, तथा च काव्यमहाकाव्य नाटक ग्रन्थेषु मालती माधव, नैषधीय चरितम्, कुमारसम्भवम् इत्यादि प्रभूतानां साहित्यशास्त्र ग्रंथानां अवलोकनं अभ्यासंच कृत्वा त साहित्यशास्त्रं ज्योतिषशास्त्रदृष्ट्या विचारयितुं शक्यं ।

ज्योतिषशास्त्रे ग्रहयोगानुसारेण यदा बुधः, गुरुः, शुक्रः, पूर्णचन्द्रः, केन्द्र- त्रिकोणे जन्मकुण्डल्यां स्युः तदा जातकः साहित्यशास्त्रस्य अभ्यासकर्ता भवति ।

'चन्द्रमा मनः प्राणश्च' इत्युक्त्यनुसारेण चन्द्रस्थितिं अनुसृत्य काव्यरचना- स्थायीभाव-व्यभिचारीभावानां तथा च रसगुणदोष छन्दालंकाराणां सम्यक् रचना कर्तुं शक्यते ।

चन्द्रस्य अंशात्मिकाशक्तिस्थितिगति द्वारा अभिधा लक्षणा व्यंजनानां शब्दशक्तीनां अनुभवं कृत्वा आत्मनः लेखनकार्यं तस्य साहित्यस्य गुणानां वृद्धिः करोति । साहित्यशास्त्रे कुमारसम्भवे पार्वत्याः वर्णनं सामुद्रिकशास्त्रानुसारेण, प्रतिमानाटके वास्तुशास्त्रस्य, शुकन शास्त्रस्य वर्णनं, मालती माधवे नायिकानायकयोः अंगशास्त्रानुसारेण वर्णनं, मालविकाग्निमित्रे स्त्री प्रशंसा, द्वारा सामुद्रिकलक्षणं, मृच्छकटिके चौर्यकला तथा च वसन्त सेनायाः कलासौन्दर्यपूर्वकं शरीरशास्त्रस्य वर्णनं सम्यक्तया दृश्यते ।

अनया रीत्या साहित्यशास्त्रस्य तथा च ज्योतिषशास्त्रस्य च अतीव सुसम्बन्धः वर्तते ।

मृत्युविज्ञानम् :

ज्योतिषविद्यार्थी श्री ह०न०काटक महोदय द्वारा रचित 'अध्यात्मज्योतिष- विचारः' इति पुस्तके पूर्वजन्मनः, वर्तमान जन्मनः, पुनर्जन्मनः विचारः, ग्रहस्य मुक्तादशा,

शनि राहू तथा च वर्तमान जन्मन: मारकदशा द्वारा दर्शिति अस्ति । इति काटके महोदयेन उदाहरण द्वारा बोधं कृतवान् ।

जातक पारिजाते लग्न दशम-अष्टमेशनि, तथा च शनिना कथितं । अष्टभाव-फलम् अ-१४ श्लोक ४८ त: ६२) तथा च मृत्यु निमित्तं बोधित वर्तते ।

मरणस्य प्राप्ति: निर्याणाध्याये प्रदर्शिता । अ-५ श्लोक १ त: १५

मरणान्तर्गतिज्ञानम् अ-१५ श्लोक ८२.

शिक्षण शास्त्रम् :(EDUCATION)

शिक्षणशास्त्रस्य अधिष्ठात्री भगवती सरस्वती अस्ति। शिक्षण शास्त्रे वैदिकी शिक्षा, उपनिषदा:, रामायणम्, महाभारतम्, श्रीमद्भागवतम्, अष्टादश-पुराणानि भगवान् वेदव्यास: तथा च तस्य दिव्याशिक्षा, पाणिनीशिक्षा, जगद्गुरु-भगवान् श्री आद्यशंकराचार्यस्य शिक्षा दर्शनं, आचार्यस्य विद्यारण्यस्य सर्वोत्तमा शिक्षा, संतशिरोमणि तुलसीदासस्य शिक्षा सृष्टि: इत्येतेषां वर्णनं अस्ति ।

केनापि उक्तम् यत् -

ज्ञान जन्या भवेदिच्छा चेष्टाजन्या कृतिर्भवेत ।
कृतिजन्या भवेच्चेष्टा चेष्टाजन्यं फलं लभेत् ।।इति ।

'शिक्ष्यते विद्योपादीयते अनया इति शिक्षा' अर्थात् मनुष्य: येन साधनेन वा पद्धत्या ज्ञानोपार्जनं करोति तमेव शिक्षणं कथ्यते ।

मनुस्मृतौ अपि वर्णितं यत्- एतद्देशप्रसूतस्य सकाशादग्रजन्मन: ।
स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवा: ।।इति ।(अ-२ श्लोक२)

शिक्षाया स्वधर्मपालनं-कर्मकुशलता, त्रिविधतापरहित सुखशान्त्युपाया:,स्वदेशप्रेम, मानवता,

स्वभाव, वर्तनं, सदाचार:, व्यवहार: अध्यात्मचिन्तनं ज्ञानप्राप्ति: इत्यादि उद्देशो वर्तते ।

शिक्षणं राष्ट्रीयतायाः, सांस्कृतिक सामाजिक आर्थिक विकासस्य साधन वर्तते ।

शिक्षा -व्याकरणं-कल्प:-ज्योतिषी-छन्द: निरुक्तं इति षड् वेदांगानि। विधात्रा सृष्टेरारम्भात् मानवं धर्मं द्वारा शिक्षणप्रदानं कृतं आसीत् । तस्मिन् विषये मुख्या संस्कृत भाषा एव आसीत् यथा संस्कृत भाषया लोक-व्यवहार: प्रचलतिस्म ।

पाश्चात्य: ऐतिहासिक: एवं दार्शनिक: श्री वील ड्युरान्ट महोदय: कथयति -

India was the motherland of our race and Sanskeit.The mother of European languages. She was the mother of our philosophy, mother through the Arabs, of much of bus mathemetics, mother through Buddha, of the ideals embodied in christinaity, mother through the village community, of self government and democracy. Mother India, in many ways is the mother of us all.

प्राचीन शिक्षायां चतु:षष्ठीनां कलानां वर्णनं वर्तते ।वात्स्यायन कृत कामसूत्रस्य टीकाकारेण श्री जयमंगलेन द्वयो: कलयो: उल्लेख: कृतो वर्तते । प्रथमा कामशास्त्रांगभूता द्वितीया च तन्त्रावापौषादिकी इति । एतयो: द्वयो: चतु:षष्ठिः प्रकारा: सन्ति । एतेषु प्रभूता साम्यता वर्तते । तेषु प्रथमे प्रकारे २४ कर्माश्रया, २० द्यूताश्रया, १६शयनोपचारिका, ४ उत्तरकला, तथा च तेषां अवान्तरभेदेन मिलित्वा ५१८ भवन्ति । शुक्राचार्यमतानुसारेण लक्षणाभिन्नता वर्तते ।

शिक्षायां क्रीडा अपि एकं अंगं वर्तते । शिक्षणे वर्तमानयुगे शिक्षणस्य प्रकारान्तराणि सन्ति तथा च तेषां फलस्वरूपे व्यावसायिकी तथा नैतिकमूल्यानां उपयोगिता मुख्यत्वेन वर्तते । शिक्षणक्षेत्रे तथा च व्यवसाये तेषां साधनेषु अस्मिन् विज्ञानयुगे प्रचुरा वृद्धि:, प्रगति: सजाता, उत्कर्षश्च संजात: । अधुना 'कौम्प्यूटर' विज्ञान द्वारा प्रत्येक क्षेत्रेषु सिद्धि: भवति ।

वर्तमान समये शैक्षणिकी कक्षां अनुसृत्य यदा व्यवसाय लभ्येत वा न इति प्रारम्भोपरि अथव जन्मकुण्डल्या: नवमदशमैकादशपंचम सप्तमेषु लग्नस्थानेषु अवलम्बितं वर्तते । किन्तु अयं प्रश्न सदा प्रश्नपरम्परायां तथा च एताभि: उत्पन्नानि अशुभ फलानि, उदाहरण तथा दारिद्र्यं, निपीडितश्रमिकावस्था, असामाजिकता इत्यादिषु परिणामानि दृश्यन्ते ।

एतान् सामाजिक प्रश्नानाम् सिद्धार्थं भारत सर्वकारेण यथासमयं शिक्षण-पद्धत्या: पुन:रचनायै तथा च परिवर्तनाय अनेके प्रयत्न: कृता: । अधुना च तस्य विषयस्योपरि गंभीरा चर्चा तथा च विचारणा प्रचलति । यस्य कारणेन निर्धनताया: निपीडितश्रमिकावस्थाया: निवृत्ति भवतु तथा च समाजसुधारणा, समानता, ऐक्य-शान्ति: एतेषां सद्गुणानां प्राप्ति: स्यात् ।

शैक्षणिक क्षेत्रे बालशिक्षाया: -प्राथमिकी शिक्षाया:, माध्यमिकी उच्च-माध्यमिकी शिक्षाया: प्रोत्साहनरूपा विकलांगीना कृते शिक्षा, मूलभूता शिक्षाया: प्राप्ति: भवति, अथ च ते सर्वे तासां मौलिक सिद्धान्ता: ।

डाक्टर सम्पूर्णानन्द महोदयानां मतेन भारतीय संस्कृते: प्रधानमंग शिक्षणमेव वर्तते । तथा सा भारतीय संस्कृति: विश्वसंस्कृते: उद्भवस्थानं अस्ति । तस्यां देशस्य-विदेशस्य संस्कृतीनां योगसंगमस्थानं वर्तते ।

अस्माकं देशस्य महात्मागांधी महाभागा:, पं०श्री जवाहरलाल नेहरू महाभागा: आचार्य श्री विनोबाभावे महाभागा: , महर्षि अरविन्द घोष, गुरुवर्य श्री रविन्दनाथ टैगोर महाभागा: , डा०राधाकृष्णन् महाभागा:, स्वामी विवेकानन्द:, स्वर्गीया शक्तिस्वरूपा इन्दिरागान्धी महाभागा, एतै: महानुभावै: द्वारा शिक्षार्थे राष्ट्रीय नीति विषयक पद्धत्यां श्रेष्ठतमान् स्व-स्व विचारान् प्रकटय्य तेषां उपयोक्तुं ते सर्वे कटिबद्धा: आसन् । तथा च अनेन कारणेन अस्माकं राष्ट्रीयता अवश्यं प्राप्स्यते अस्माभि: इत्याकारक: दृढो विश्वास: अस्ति । वर्तमाने माननीय श्री राजीवगान्धी महोदय द्वारा अपि शिक्षणमुपलक्ष्य राष्ट्रीय नीति-पद्धत्या: नूतनविचारा: पुस्तक द्वारा प्रकाशिता: आसन् । तेषु प्रास्ताविकेषु सामाजिक कल्याण शिक्षण हेतव:, शिक्षणस्य तत्वं तस्य भूमिका च, शिक्षणस्य राष्ट्रीय पद्धति:, समानतायै(साम्यार्थं) शिक्षणं, अनुसूचित जात्या: शिक्षणं, विकलांगानां शिक्षणं, प्रौढ़शिक्षणं, बाल-शिक्षयारभ्य उच्चशिक्षण, व्यावसायिकं शिक्षणं, निबन्ध शिक्षणं, व्यवसायस्य शिक्षणस्य अपृथकत्वं, च परिवर्तने, यांत्रिक शिक्षाया: संशोधनं, कार्यक्षमताया: उत्तेजनं संचालनं एकीकरणं च परिवर्तनं, शिक्षणस्य विषयवस्तुसंरक्षणं, भाषामूल्यरक्षणं, पुस्तकालय:, भाषाकीयं माध्यमं, कार्यानुभव:, शिक्षणं पर्यावरणंच, गणितं-विज्ञानं इत्यादिनां शास्त्राणां शिक्षणं, व्यायाम: क्रीडादि शिक्षणं विद्यार्थीनांकार्यशक्ति:, तेषां महत्वाकांक्षायां अभिवृद्धि:, मूल्यांकन पद्धति:, परीक्षापद्धत्यां नूतनकारणं, शिक्षकानां प्रशिक्षणं, शिक्षणसंचालनं, भारतीय शिक्षणसेवा, राष्ट्रीयस्य,राज्यस्य ग्रामाणांकृतेशिक्षण संस्थानां कृते साहाय्यं, शैक्षणिकी अद्यतनं वस्तूनि एतेषां सर्वेषां अवलोकनं तथा च भविष्यत्काले-यस्मिन् शिक्षणस्य बौद्धिकाध्यात्मिक - सामाजिक सिद्धिनां उच्चस्थानं प्रदत्तं ।

शिक्षणं एव मानवसम्पदाया: विकासाय राष्ट्रव्याप्त: श्रेष्ठ: प्रयत्न वर्तते ।

## पुराणेषु ज्योतिषशास्त्रस्य संदर्भः

(१)श्रीब्रह्मपुराणम् : इदं प्रथमं पुराणं वर्तते । ब्रह्मणा रचिते अस्मिन् पुराणे २४५ अध्यायाः, १४०० श्लोकाः सन्ति । अस्मिन् पुराणे १३ शताब्द्याः तथा विश्वसृष्टेः, मनुरुत्पत्ति कथा, अन्यप्राणिसृष्टि वर्णनं, पृथिव्याः अनेकेषां खण्डानां वर्णनं, देवालयानां वर्णनंच (वास्तुशास्त्रस्य) तथा च मानवधर्माणां वर्णनं समायाति ।

(२) श्री पद्मपुराणम् : अस्मिन् पुराणे ५५००० पद्यसंख्या वर्तते । तथा च कालवर्णनम् , सृष्टेः वर्णनं, भूमिवर्णनं तथा च मनुष्याणां ६ प्रकाराणां सृष्टीनां वर्णनं वर्तते ।

(३) श्रीविष्णुपुराणम् : अस्मिन् पुराणे १२६ अध्यायाः, ६००० श्लोकाः सन्ति । तथा च गुरुणामैत्रेयेण विश्वोत्पत्ति वर्णनं, स्वभाववर्णनं, मानवोत्पत्ति वर्णनं, समुद्रमन्थनकथा, भूगोलवर्णनम्, शास्त्रकलानां सूचयः, मानवानां कृते मांगलिक प्रसंगानां वर्णनम्, चतुर्णां पुत्राणां वर्णनम्, कलियुगस्य दोषाणां वर्णनम्, भविष्यकथनस्य वर्णनम्, उत्पत्तेरवस्थाया,मृत्योः, ज्ञानप्राप्तेः साधनानां वर्णनं वर्तते ।

(४) श्री शिवपुराणम् : अस्मिन् पुराणे २३००० श्लोकाः सन्ति । अस्मिन् पुराणे बल्लारसेनेन दानसागरे, तथा आरबदेशस्य यात्रिणा अलबरुणी उल्लिखितमस्ति । अस्मिन् पुराणे सप्त संहिताः सन्ति ।(१) विश्वेश्वर संहिता (२) रुद्रसंहिता (३) शतरुद्रसंहिता (४) कोटीरुद्रसंहिता (५) उमासंहिता (६) कैलास संहिता (७) वायवीया संहिता इति ।

मननम् इत्यादि स्वरूपाणां वर्णनं, सदाचारस्य सृष्टेः द्वादशज्योतिर्लिङ्गानां उल्लेखो वर्तते । तथा च मुद्रा न्यासादीनां वर्णनं समायाति ।

(५) श्रीमद्भागवतपुराणम् :

अस्मिन् पुराणे १८००० श्लोकाः, १२ स्कन्धाः, अतीव जनप्रियाः सन्ति तथा च ज्ञानकर्मभक्तीनां प्रधानता, एकताया अनेकता सिद्धिकर्ता इत्यादि वर्णनं, कलिनिग्रहः, सृष्टिकारणं, प्रकलम् मानवधर्माः, गृहस्थधर्माः, मन्वन्तरकथा, मनुष्य निरूपणम्, समुद्रमंथनम्, भुवनकोशवर्णनं, भविष्यकलि निर्देशः, इत्येतेषां समीचीन वर्णनं अस्मिन् पुराणे वर्तते । अतः इदं पुराणं मानवभक्तिसागरः इति नाम्ना पि बुध्यते ।

(६) नारद महापुराणम् :

अस्मिन् पुराणे २०७ अध्यायाः, ११००० श्लोकाः सन्ति, तथा च अस्मिन् पुराणे समस्तानां विद्यानां प्रतिपादनम्, मनुष्याणां कृते सदाचार वर्णनं, कलिवर्ज्यकर्माणां वर्णनम्, भौगोलिक वर्णनम्, भारतवर्ष इति नामकरणवर्णनम्, सत्यमहिमावर्णनं, वेदांगानाम्, ज्योतिष महत्वं इत्यादीनां उल्लेखो वर्तते ।

(७) श्री मार्कण्डेयपुराणम् :

१३४ अध्यायसहितं तथा च ९००० श्लोक संयुक्तं इदं पुराणं वर्तते । अस्य पुराणस्य आंगलभाषायां अनुवादः 'पार्जिटरेण' कृतो वर्तते । तथा च जर्मन भाषायामपि अस्य पुराणस्य अनुवादः कृतो वर्तते । इदं पुराणं पाश्चात्यविदुषां समाजे अतीव लोकप्रियं वर्तते । अस्मिन् पुराणे मरणोत्तर जीवन कथायाः वर्णनं सम्मिलति ।

अस्मिन् पुराणे महर्षिणा जैमिनना द्वारा चतुर्णां प्रश्नानां वर्णनं वर्तते - यथा :-

(१) निर्गुणवासुदेवस्य मानवस्वरूपस्य कारणम् ।

(२) द्रौपद्याः पंचभर्तारः कथं इति ।

(३) बलरामस्य प्रायश्चितं तीर्थयात्रा द्वारा कथं? इति ।
(४) द्रौपद्याः पंचपुत्राः असहाय्यावस्थायां कथं मृताः? इति ।

तेषां चतुर्णां प्रश्नानां उत्तराणि ४ तः ७ अध्याये सन्ति । इदं भारतीया कथा साहित्ये रत्नारूपा वर्तते । अस्मिन् पुराणे ज्ञान योगस्य-कर्मयोगस्य च समन्वयो वर्तते । तथा च कर्मविपाकस्य-सदाचारस्य आश्रमधर्माणां वर्णनम् वर्तते । अस्य पुराणस्य १३ तमे अध्याये देवीमाहात्म्यं वर्तते ।

(८) श्री अग्निपुराणम् :

अस्मिन् पुराणे तान्त्रिकसाधना, देवतादेवीनां मूर्तिनिर्माण वर्णनम् तेषां तासां च प्राण-प्रतिष्ठा वर्णनम्, मृत्यु पुनर्जन्मयोः वर्णनम्, लोकशिक्षणस्य, विद्या-संग्रहस्य च वर्णनम्, रोगोपचारस्य, विषोपचारस्य च वर्णनम्, औषधी वर्णनम्, चतुष्पादप्राणीनां उपचार वर्णनं यथा- अश्व-गज-गो उपचार वर्णनम्, वनस्पति शास्त्रस्य वर्णनम्, रत्नलक्षणम् तेषां भेद-परिक्षणादि वर्णनम्, धनुर्वेद वर्णनम्, आयुधलक्षणानां वर्णनम्, तेषां प्रकाराणां, प्रयोगाणांच वर्णनम्, भुवननिर्माणस्य (वास्तु)वर्णनम्, तथा च ज्योतिषशास्त्रस्य तथा च तेषां शाखायुपरि २८ अध्यायाः सन्ति ।

(९) श्री भविष्यपुराणम् :

अस्मिन् पुराणे ३००० श्लोकाः, चत्वारि पदानि यथा ब्राह्मं, मध्यम्, प्रतिसर्गः, उत्तरश्च वर्तन्ते ।प्रथमं ब्रह्मपर्वं प्राचीन वर्तते । तस्य सृष्टिवर्णनं मनुस्मृतिवत् अस्ति । नागपञ्चमी व्रतं, सूर्यपूजापद्धतिः यस्यां भोजकमंत्र नाम्नोः द्वयोः सूर्यपूजनयोः कथनकम् वर्तते । अस्य सम्बन्ध पारसीप्रजया सह वर्तते इति विचार्यते श्रीकृष्णापुत्रसाम्बेन कुष्ठरोगस्य चिकित्सा सूर्योपासना द्वारा कृत्वा रोगमुक्तः संजातः । तथा च सूर्योपासना, रहस्यं

इत्यादिनां वर्णनं अस्ति । अस्मिन् पुराणे अनेक व्रतविवरणम्, सामुद्रिकलक्षणम्, भूलोकविस्तारः, ब्राह्मणादीनां लक्षणं कर्तव्यंच, वृक्षारोपणं, वापीकूपजलाशयदेवतानां प्रतिष्ठाविधिः, कुण्डमण्डप पद्धत्याः वर्णनं वर्तते ।

## (१०) ब्रह्मवैवर्तपुराणम् :

अस्मिन् पुराणे १८००० श्लोकाः सन्ति । चतुर्विध खण्ड युक्तं यदं पुराणं वर्तते यथा- ब्रह्म, प्रकृतिः गणेशः, कृष्णजन्म इति प्रथमे खण्डे सृष्टिवर्णनं केवल ३० अध्यायपर्यन्तं वर्तते । द्वितीये खण्डे प्रकृतिवर्णनम्, तृतीये खण्डे गणेशस्य जन्म-कर्मचरितस्य वर्णनम्, वर्तते । चतुर्थे खण्डे राधाकृष्णगोपीना लीलायाः, प्रेमलीलायाश्च वर्णन वर्तते ।

## (११) श्री लिंगपुराणम् :

अस्मिन् पुराणे १३ अध्यायाः ११००० श्लोकाः सन्ति । इदं पुराणं पूर्वार्द्धं उत्तरार्द्धरूपेण विभागे वर्तते । अस्मिन् पुराणे सृष्टिवर्णनम्, शिवस्य २८ अवताराणां वर्णनम्, तन्त्रशास्त्र ज्ञान वर्णनम्, शिवव्रततीर्थादीनां, शिवस्य अष्टमूर्तिनां नाम्नां वर्णनम्, यथा(१) पृथिव्यात्मकं शिवमूर्तेः नाम शर्व इति ।(२) जलीयतत्ववात्मकं भव इति । (३) अग्नितत्वात्मकं पशुपति रिति । (४) वायुतत्वात्मकं ईशानमिति । (५) आकाशतत्वात्मकमूर्तिः यथा भीमः । (६) सूर्यतत्वात्मकं मूर्तिनाम रुद्रं ।(७)सोममूर्ति-तत्वात्मकं महादेव इति । यजमानमूर्तिनाम उग्रः इति । पाशुपतव्रतस्वरूपं माहात्म्यं वर्तते । अस्य पुराणस्य कालः २ अथवा ३ शताब्दी मन्यते ।

## (१२) वराहपुराणम् :

अस्य कालः २० दशमी शताब्दी मन्यते । २४००० श्लोकात्मकं इदं पुराणं वर्तते । अस्मिन् पुराणे सृष्टेः वंशावली, विष्णोः पूजापद्धतिवर्णनं, व्रतश्राद्धप्रायश्चित्तानां

वर्णनं, देवप्रतिमानिर्माण वर्णनम्, तिथीदानाशौचानां वर्णनम्, जगत: सृष्टे: भूगोलस्य, तथा च कर्मविपाकविषया चर्चाया: वर्णनं, विविधानां मासानां द्वादशी व्रत वर्णनं, अवतारवर्णनं च अस्ति ।

(१३) श्री स्कंदपुराणम् :

इदं पुराणं अतीव विस्तृतं वर्तते । अस्य पुराणस्य श्लोक संख्या ८१००० वर्तते । अस्य समय: सप्तमीसदी मन्यते । अस्य पुराणस्य प्रथमे सप्त खण्डे (१)माहेश्वरस्य (२) वैष्णावस्य (३) ब्राह्मस्य (४) काश्या: (५) आवन्त्या: (६) नागरस्य (७) प्रभासस्य तथा च अन्ये षड् संहितायां विभक्ता: सन्ति । (१) सनत्कुमार:(२)सूत:(३) शांकरी: (४) वैष्णावी(५) ब्राह्मी (६) सौर: इति ।

अस्मिन् पुराणे जगन्नाथपुर्या: प्राचीन: इतिहास: वर्तते ।उज्जयिन्या: महाकालस्य वर्णनं, विश्वकर्मोपाख्यानं च वर्तते ।

(१४) वामनपुराणम् :

अस्मिन् पुराणे ६५ अध्याया:, ५४५१ श्लोका: सन्ति । तस्मिन् २६,४४, ६३ एते अध्याया: गद्यरूपेण सन्ति । अस्य रचनाकाल: षष्ठशताब्द्या: ६ शताब्दी इति मन्यते विद्वद्भिः । अस्मिन् पुराणे कामशास्त्रस्य उल्लेख:, तीर्थस्य , सदाचारस्य, आश्रमधर्मस्य, व्रतस्य, कर्मविपाकस्य, भौगोलिक सामग्र्या:, सप्तद्वीपानां, जम्बुद्विपस्य, इलाद्विपस्य, भारतवर्षस्य तथा च तेषां नवद्विपानां वर्णनं, इन्द्रस्य, कशेरो:, ताम्रपर्णस्य, गभस्तिमानस्य, नागानां, कटाहस्य, सिंहलस्य, वारुणस्य कुमारस्य वर्णनानि वर्तन्ते । अस्मिन् पुराणे बृहद् भारतवर्षस्य स्पष्टरूपेण वर्णनं वर्तते ।

विवाहस्य, सतीप्रथाया:, वर्णव्यवस्थाया:, आश्रमव्यवस्थाया:,वर्णनानि सन्ति । ग्रीष्मशरद्वसन्तादिऋतूणां वर्णनं अपि वर्तते । अस्य भाषा मधुरा,सरला, स्वाभाविकी च वर्तते ।

## (१५) कूर्मपुराणम् :

सात्विक राजसिकतामसिकेषु केषु वर्गेषु पद्मपुराणस्य तामस: अभिप्रायो वर्तते ।

इदं पुराणं १८००० श्लोकात्मकं अस्ति । इदं पुराणं पूर्वार्द्ध-उत्तरार्द्धेन द्वाभ्यां विभाजितं । नारदपुराणानुसारेण ब्राह्मी, भागवती, सौरी वैष्णवी इति चतुर्षु संहितासु विभक्त: ।

ऋषिवंशस्य, सूर्यवंशस्य, इक्ष्वाकुवंशस्य, पुरुवंशस्य वर्णनानि सन्ति । युगवर्णनमपि अस्मिन् पुराणे अस्ति । भुवनकोशस्य, भूमिस्वरूपस्य, च भौगोलिकज्ञान-वर्णनानि सन्ति । अस्य पुराणस्योत्तरार्द्धे ईश्वरगीता वर्तते । अध्ययनप्रकारस्य, स्नातक धर्मस्य, भोजनविधे: श्राद्धकल्पस्य, आशौचप्रकरणस्य प्रलयादिकथनस्य प्राप्ति: अस्मादेव भवति ।

## (१६) मत्स्यपुराणम् :

अस्य समय: २ त: ४ शताब्द्या: वर्तते । २८१ अध्याया: १४०७२ श्लोक: सन्ति । 'पुराणेषु तथैव मात्स्यम्' इति कथितं । अष्टादशपुराणेषु इदं पुराणं सर्वश्रेष्ठं वर्तते । अस्मिन् स्थितं नर्मदावर्णनं अलौकिकं एव । अस्य पुराणस्य मतानुसारेण मनुस्मृति:, याज्ञवल्क्यस्मृति:, विक्रमोर्वशीय नाटकं, उर्वशी उपाख्यानं च रचितं इति मन्यन्ते विद्वभि: । अस्मिन् पुराणे सृष्टे: विस्तृतं वर्णनं, वंशानुक्रमस्य, पितृवंशस्य, श्राद्धकल्पस्य प्रयागभौगोलिक वर्णनानि सन्ति । काशीनर्मदयो: माहात्म्यं, शकुनविचारस्य, गृहप्रवेशस्य, देवताप्रतिमाया:, देवालयस्य, भवननिर्माणस्य, ज्योतिषकालक्रमस्य चर्चा: सन्ति ।

अस्मिन् पुराणे समस्तपुराणानां विषयानुक्रमणिका अस्ति । ऋषिवंशवर्णनं, तथा च देव पुरुषकारस्य, सामदानभेद दण्डादिनां, वर्णनानि सन्ति । राजनितिसूचनमपि वर्तते । अस्मिन् स्थित: शान्तिखण्ड: अपि अतीव महत्वपूर्ण: वर्तते । प्रतिमारचनाया: प्रतिष्ठाया:, पीठनिर्माणस्य, प्रतिमालक्षणस्य इत्यादिनां वैज्ञानिक प्रमाणिकानि वर्णनानि सन्ति ।

(१७) गरुडपुराणम् :

अस्मिन् पुराणे १९००० श्लोका: सन्ति । २४० अध्याया: वर्तते । इदं पुराणं पूर्वार्धोत्तरार्ध भेदेन द्वि विभागं वर्तते । अस्मिन् समस्तानां विधानां वर्णनं, सर्वदेवपूजन वर्णनं, तथा च विधिनिरूपणं वर्णितमस्ति । रत्नलक्षणं, परीक्षणं, ग्रहशान्ति:, व्रतम्, आयुर्वेद , सृष्टिक्रम:, ज्योतिष, शकुनविचार:, सामुद्रिकशास्त्र तथा च गीतासारांश: इत्येतेषां वर्णनानि वर्तन्ते ।

(१८) ब्रह्माण्डपुराणम् :

अस्य काल: ४ त: ६ शताब्दीपर्यन्त: वर्तते । अस्य पुरास्य प्रथमे द्विपादयो: विश्वस्य भूगोल वर्णनं अस्ति । जम्बुद्विपस्य, पर्वतस्य तथा: एतेषां वर्णनं वर्तते । भारतवर्षस्य विभिन्नस्थानानां विशदं वर्णनं अस्मिन् पुराणे वर्तते । अनेन प्रकारेण ग्रहाणां, नक्षत्राणां, युगानाच वर्णनं प्रस्तुतं वर्तते ।

(१९) वायुपुराणम् :

समय ~~स्त:~~ ३ त: ६ शताब्दपर्यन्तस्य वर्तते । १११ अध्याया: सन्ति । चतुष्पादेषु (१) प्रक्रीया (२) अनुषंग, उपोद्घात: (४) उपसंहार: एतेषु विभक्तं अस्ति । अस्मिन् पुराणे ब्रह्माण्ड रचनाया:, सृष्टिप्रक्रीयाया: विस्तृतं वर्णनं अस्ति ।

सृष्टिप्रकारस्य, कल्पभेदस्य, च मन्वन्तरवर्णनानि सन्ति । आश्रमपद्धत्या:, देवसृष्टे:, अरिष्टस्य वर्णनानि वर्तन्ते । सृष्टि-प्रलयादि संशयनिवारणविषयिकी चर्चा अपि वर्तते ।

(२०) विष्णुधर्मोत्तरपुराणम् :

अस्य पुराणस्य २६६ अध्यायाः एव, द्वि,त्रिकि भागे: विभक्तो वर्तते । अस्मिन् शंकरगीतायाः वर्णनं अपि वर्तते । भौगोलिक वर्णनं, लोकवर्णनं, भारतवर्षवर्णनम्, एतानि विद्यमानानि सन्ति । मन्वन्तरवर्णनं, कल्पान्तरवर्णनम्, कालवर्णनम्, नक्षत्र-वर्णनम्, नक्षत्रस्नानविधिवर्णनं, ग्रहपूजाविधानवर्णनं, ग्रहशान्ति इत्यादीनि वर्णनानि सन्ति । राजनीते: वर्णनं, सामुद्रिकशास्त्रस्य वर्णनं, वास्तुविधानवर्णनं, आयुर्वेद-शकुन-गणित-फलितज्योतिषानि पितामहसिद्धान्तानुसारेण प्राप्यते । तृतीये भागे हंसगीता वर्तते । देवालय विषयक, पूजन-मोक्षमन्त्रमानभाषाकौशालंकारनृत्य नाटकानां अंगरसानां, वर्णनानि सन्ति । तथा च वास्तुशास्त्रस्य वर्णनं वर्तते ।

(२१) हरिवंशपुराणम् :

इदं महाभारतस्य परिशिष्टं वर्तते । तस्मिन् १६३७४ श्लोकाः सन्ति । सृष्टेः प्रक्रीयावर्णनं सर्वेषु पुराणेषु विषयत्वेन वर्तते । हरिवंशपुराणं धार्मिकी कृतिः वर्तते । अन्तिमे हंसोपाख्यानं-तथा च डिम्बकोपाख्यान च श्रेष्ठे वर्तते । पुत्रोत्पत्ति विषयकं अथ वंशवृद्धि अर्थं अस्य पुराणस्य विधि-प्रामाण्यं पारायणंच श्रेयस्करं भवति ।

(२२) देवीभागवत पुराणम् :

अस्य पुराणस्य उपपुराणे गणना भवति । तस्य १२ स्कंधाः सन्ति । प्रत्येके स्कंधाः देव्यागायत्र्या प्रारभ्यन्ते ।

सर्वचैतन्य रूपां तां आद्यां विद्यां च धीमहि ।
बुद्धिं या नः प्रचोदयात् ।। इति ।

अस्य पुराणस्य द्वादशस्कंधानां ३१८ अध्यायाः सन्ति । तथा च १८००० श्लोकाः सन्ति । महाकाली महालक्ष्मी महासरस्वतीनां त्रिगुणात्मिकायाः वर्णनानि सन्ति । अष्टम स्कन्धे भुवनकोशस्य, नक्षत्र चन्द्रमसोर्वर्णनानि सन्ति । दशमस्कन्धे मनोरुत्पत्ति विषयकं विवरणं वर्तते । अयं ग्रंथः परमादेव्या भुवनेश्वर्याः परमतत्वस्वरूपेण स्वीकृतः वर्तते ।

भगवान् श्रीकृष्णः द्वैपायनः वेदव्यासस्य शिष्यः, सामवेदस्य रचयिता वर्तते, यं सामवेदं विषयीकृत्य भगवता श्रीकृष्णेन भगवद्गीतायां स्वमुखे उक्तं यत् वेदानां सामवेदोऽस्मि (गी०३१-१०-९ (गी०अ-१० श्लोक२२) अतः तं महर्षिः कौण्डर्षिः इति नाम्ना पि बुध्यते विद्वद्भिः। जैमिनीयसूत्रे अध्यायः १ तः आरभ्य ४ पर्यन्तं विष्ट्या ६१६ सूत्राणि सन्ति । प्रत्येकेषु अध्यायेषु चतुष्पादाः सन्ति । ज्योतिष अभ्यासक्रमे विश्वविद्यालयेषु वर्तमान समये केवलं प्रथमौ द्वौ अध्यायौ पाठ्यक्रमे वर्तते । अध्यायौ चान्तिमौ तृतीयचतुर्थौ नोपलभ्येताम् । अतः न प्रचलितौ वर्तेते । जैमिनीय सूत्रस्य प्रथमेन अध्ययनकर्ता श्री नीलकण्ठेन यदि अस्य ग्रंथस्य टीका न कृता वर्तेत तदा तस्य ग्रंथस्य सूत्रान् बोधितुं वर्तमानकालिनैः विद्वद्भिः विद्यार्थिभिः अति स्युः ।

कल्याण भाग ११ संख्याः १-२, सन् १९३६ तमे अंके- आचार्य जैमिनेः अभिप्रायस्य प्रभूतोल्लेखः ब्रह्मसूत्रे प्रदर्शितः । सः मीमांसादर्शनस्य रचयिता आसीत् । मीमांसादर्शनस्य सिद्धान्ताः ब्रह्म सूत्रे , तथा च ब्रह्मसूत्रस्य सिद्धान्ताः मीमांसादर्शने परस्परं अभिप्रायरूपेण दृश्यन्ते । मीमांसादर्शने कस्मिश्चित् स्थाने ब्रह्मसूत्रस्य सिद्धान्ताः गृहीताः । अनेन इदं अवबुध्यते यत् महर्षि जैमिनिः बादरायणसमकालिन आसीत् । सः वेदव्यासस्य शिष्यःआसीत्

मीमांसादर्शन लिखित्वा तेन भारतसंहिता, विरचिता आसीत् याम् जैमिनीभारतम् इत्यपि उच्यते । जैमिनिना सामसम्बन्धयुक्ता जैमिनीय संहिता, ब्राह्मण-उपनिषद्, श्रौतं, गृह्यसूत्राणां प्रणयनं कृतं आसीत् । षोडश अध्याय युक्तायाः संकर्षणकाण्डसहितायाः पूर्वमीमांसायाः प्रणयनं अकरोत् । तथा च मीमांसायाः सांगोपांग वर्णनं कृतं आसीत् । तेन द्रोण पुत्रैः सकाशात् मार्कण्डेयपुराणं श्रुतमासीत् । तस्य पुत्रः समन्तुः आसीत् पौत्रः सत्वानः आसीत् । एभिः त्रिभिः सम्मिल्य एकायाः संहितायाः श्री पराशरपुत्र पाराशर्य्य शिष्येणश्री जैमिनि मुनिना पृथिव्यां स्वर्ग निर्माणाय दश सिद्धान्तानां प्रतिपादनं कृते वर्तते । तद्यथा-(१) तात्त्विक,व्यावहारिक तथा च कौटुम्बिक सुव्यवस्थायै सत्यसिद्धान्तानां सुनिश्चयं कृतं वर्तत , सत्यसिद्धान्तानां पालन करणाकारण विषये व्रतनिष्ठमनुष्यान् अपि व्रते पारंगताः करणीयाः स्युः । यदि व्रतनिष्ठाः मानवाः न स्युं तदा सत्यसिद्धान्तानां न कोऽपि हेतुः ।

(२) यदा अस्मिन् जगति बुद्धिशक्त्याः, शरीरशक्त्याः, तथा च वित्तशक्त्याः प्रवाहः मानवकल्याणाय भवेत् तदा हि सत्स्वरूपेण मानवता विकसेत् ।

(३) निर्धनजनेभ्यः साहाय्यं कुर्यात् तथा च न कान् अपि मनुष्यान् निर्धनस्वरूपेण प्रतिष्ठापयेत ।

(४) जीवनं पुष्टीमयं (पुष्ट) स्यात् तथा च एतदर्थाय अर्थात् पुष्टीयुक्ताय जीवनाय समग्रं वायुवावरणं आनन्देन पूरणीयम् ।

(५) धात्रीवृत्तिं पुष्टिप्रदानं कुर्यात् । "नायमात्मा बलहीनेन लभ्यः" अतः बलवन्तः एव भवेयुः । भगवान् सर्वेषु जनेषु स्थानेषु च वसति, किन्तु तस्य आसुरी-वृत्ति न पुष्णीयात् । अतः त्रिगुणात्मिकायाः महाकाली महालक्ष्मी महासरस्वत्याः पूजायाः प्रसारः कृतः वर्तते ।

(६) नेतृत्वं प्रभावशाली एव स्यात् । कुतः प्रतिभावान(प्रभावी) नेता ही संस्कृतेः नवनिर्माणं करिष्यति करोति च । यदा पृथिव्यां उपरि स्वर्गनिर्माण-कार्यं करणीयं स्यात् तदा प्रतिभावतं नेतृत्वं आवश्यकं ।

नेतुः स्वभावेऽपि पुष्पवत् सुगंध अत्यावश्यकः वर्तते । सः दीर्घदृष्टा अपि भवेत् तथा च निःस्वार्थी प्रेममयः तथा अपेक्षापाती भवेत एव ।

(७) स्त्री शिक्षिका एव । प्रत्येका स्त्री वीरकन्या , वीरपत्नी तथा वीरमाता एव भवेत् ।

(८) गृहस्थेन वैभव प्राप्त्यर्थं सततं प्रयत्नवान् भवेत् । विद्वान्तः जनाः एव आम्रवृक्षवत् छाया पक्षिणां कलरवः तथा च मिष्ट भोजनानि दातुं समर्थाः। वेदेषु पशुपालनं, कृषि, धर्मं, विद्या तथा च सदीर्घायुष्यं अतिथिसत्कारः एतादृशानि लक्षणानि परिगणितानि सन्ति ।

(९) ज्ञानिभिः पुरुषैः शक्तिवन्तैः पुरुषैः तथा च विक्रान्तैः पुरुषैः सदा सहकारभावेन हस्ते एव हस्तस्यमेलनं कृत्वा कार्यं करणीयं । 'सहनाववतु सहनौभुनक्तु सह्वीर्यं करवा वहै । तेजस्विनावधीत मस्तु, मा विद्विषावहै।' अयं मंत्रः सुप्रसिद्धः एव ।

(१०) परमात्मनः प्रति तथा च परमात्मनः प्राकट्यस्वरूपरूपाणि समाज प्रति हृदि प्रेम, आत्मीयता सदा वर्धनीया भवेत् ।निर्माण कृतमासीत् । यस्याः अध्ययनं हिरण्यनाभः पैष्यन्जिः अवन्त्य इति त्रीन् शिष्यान् कारितवान् ।

तस्य पितुनाम विषये न किंचिदपि ज्ञायते । प्रयोगानुसारेण जिमिन् या जैमिन् इति शक्यते । अतः मिमांसाजैमिनीया इति कथ्यते । 'जैमिनीय' इति प्रायोगिकदृष्ट्या जैमिन् इति नाम अपि सिद्धं भवति । तस्य समय निश्चय विषयेऽपि न सारल्यं। किन्तु श्रीव्यासस्य समय द्वापरे आसीत् इति मन्यते । अतः जैमिनेः कालः अपि द्वापरे एव आसीत् इति ज्ञायते । महर्षेः जैमिनेः सूत्राणमुपरि अनेकैः व्याख्याकारैः प्रामाणिका व्याख्या कृता वर्तते । तेषु बौधायनः, उपवर्षः, देवस्वामी, भवदासः ते सर्वे प्रसिद्धाः ।

## श्रीमज्जैमिनिप्रणीते मीमांसा दर्शने

| ग्रंथा: | प्रणेतार: |
| --- | --- |
| मीमांशादर्शनं (सूत्राणि) | जैमिनि: |
| सूत्रवृत्ति: | उप वर्ष: |
| मीमांसा सूत्रभाष्यम् | शबरस्वामी |
| वार्तिकम् (श्लोकवार्तिकं तन्त्रवार्तिकं दुपट्टीका) | भट्ट कुमारिल |
| विधि विवेक: | |
| भावनाविवेक: | मण्डन मिश्र |
| विभ्रमविवेक: | |
| न्यायकणिका | |
| शास्त्रदीपिका | |
| न्याय रत्नाकर: | पार्थसारथि मिश्र |
| न्याय रत्नमाला | |
| तन्त्ररत्नम् | |
| न्यायसुधा, तन्त्रसार: | भट्ट सोमेश्वर: |
| जैमिनीय न्यायमाला विस्तर: | माधवाचार्य: |
| विधिरसायनम् | |
| मयूनावलि: | अप्पय्य दीक्षिता: |
| उपक्रम पराक्रम: | |
| वादनक्षत्रमाला | |

| | |
|---|---|
| सिद्धान्त चन्द्रिका<br>सिद्धान्त चन्द्रिकागूढार्थ विवरणम् | रामकृष्ण |
| भट्टचिन्तामणि: विश्वेसर सूरी | (गागाभट्ट:) |
| भाट्टदीपिका<br>भाट्टरहस्यम्<br>भाट्ट कौस्तुभ:<br>फलैकत्व वाद: | खण्डदेव: |
| चिन्तामणि: | भास्करराय:।श्रीमद्वाग्केश्वर: |
| बृहती )<br>) शाबरभाष्यव्याख्ये<br>लघ्वी ) | प्रभाकर: |
| ऋजुविमला<br>प्रकरणपंचिका | शालिकनाथ मिश्र: |
| नयविविक: | भवनाथ: |
| नयविवेक दीपिका | वरदराज: |
| सुबोधिनी | रामेश्वसूरी |
| मीमांसान्याय प्रकाश: | आपदेव: |
| प्रभावली | शंभु भट्ट: |
| वार्तिकाभरणम् | श्री वेंकटेश्वरमखी |
| मीमांसापरिभाषा | कृष्ण यज्वा |
| पूर्वमीमांसाधिकरण कौमुदी | रामकृष्ण भट्टाचार्य: |
| अर्थसंग्रह: | लौगाक्षि भास्कर: |
| मीमांसाबाल प्रकाश:<br>कुतहल वृत्ति: | भट्टशंकर<br>वासुदेवाध्वरी |
| शाबर भाष्य विवरणम् | गोविन्दमुनि: |
| मीमांसा चन्द्रिका | ब्रह्मानन्द सरस्वत्य: |

## दैवज्ञ लक्षण

तत्र सांवत्सरोऽभिजातः प्रियदर्शनो विनीतवेषः सत्यवागनसूयकः समः सुसंहितोपचितगात्रसन्धि रविकलश्चारुकर चरण नखनयन चिबुक दशन श्रवण ललाट भ्रूमांगो वपुष्मान गम्भीरोदात्त घोषः । प्रायः शरीराकारानुवर्तिनो हि गुणा दोषाश्च भवन्ति ।

तत्र गुणाः । शुचिर्दक्षः प्रगल्भो वाग्मी प्रतिभावान् देशकालवित् सात्त्विको न पर्षद्भीरुः सहाध्यायिभिरनभिभवनीयः कुशलो ~~व्यसनि~~ व्यसनी शान्तिक पौष्टिकाभिचार स्नानविद्याभिज्ञो विबुधार्चनव्रतोपवासनिरतः स्वतन्त्राश्चर्योत्पादित प्रभावः पृष्टाभिधात्यन्यत्र दैवात्ययात् । ग्रह गणित संहिता होरा ग्रन्थार्थ वेत्तेति ।

तत्र ग्रहगणिते पौलिशरोमक वासिष्ट सौर पैतामहेषु पंचस्वेतेषु सिद्धान्तेषु युगवर्षायनर्तुमासपक्षाहोरात्रयाम मुहूर्त नाडी प्राणत्रुटि त्रुट्याद्यवयवादिकस्य कालस्य क्षेत्रस्य च वेत्ता ।

चतुर्णां च मानानां सौरसावननाक्षत्र चान्द्राणामधिमासकावम सम्भवस्य च कारणाभिज्ञः ।

षष्ट्यब्द युगवर्षमासदिन होराधिपतीनां प्रतिपत्तिच्छेदवित् ।

सौरादीनां च मानानाम सदृशसदृशयोग्यायोग्यत्व प्रतिपादन पटुः ।

सिद्धान्त भेदे प्ययननिवृत्तौ प्रत्यक्ष सममण्डललेखा सम्प्रयोगाभ्युदितांशकानां छाया जलयन्त्रदृग्गणित साम्येन प्रतिपादन कुशलः ।

सूर्यादीनां च ग्रहाणां शीघ्रमन्दयाम्योत्तर नीचोच्च गति कारणाभिज्ञः ।

सूर्याचन्द्रमसोश्च ग्रहणे ग्रहणादि मोक्षकालदिक् प्रमाणस्थिति स्थिति विमर्द वर्णादेशा नामनागत ग्रहसमागम युद्धानामादेष्टा ।

प्रत्येक ग्रहभ्रमण योजन कक्ष्याप्रमाण प्रतिविषय योजन परिच्छेद कुशल: ।

भूमगण भ्रमण संस्थानायवाव लम्बकाक्षव्यासि चरदलकालराश्युदय च्छायानाडी करणप्रभृतिषु चैत्रकाल करणेष्वभिज्ञ: ।

नानाबोध प्रश्नभेदोपलब्धि जनित वाक्सारो निकषसन्तामाभिनिवेश: कनकस्ये वाधिकतरममलीकृतस्य शास्त्रस्य वक्ता तन्त्रज्ञो भवति ।

अस्य शोध प्रबन्धस्य लेखन कर्मणि यैर्महानुभावै: विद्वज्जनै: पण्डितवर्यै: स्वकीयं अमूल्यं समयं प्रदाय मार्गदर्शनं कृतं तथा च स्वकीयं विचारं सम्प्रेष्य सहाय्यं कृते तेषां सर्वेषां महानुभावानां विशेषतो श्रीमन्त: डा० बी०वी०रामन ,डा० नेमिचन्द्र शास्त्री, पंडित श्री दाते, पंडितश्री के०वी० मेहता, पंडितश्री एम०वी०जोशी, डा० प्रभाकर शास्त्री, पंडितश्री गिरधारीलाल शर्मा, डा० शान्तिधर शर्मा, श्रीमती भारतीबेन जानी, कु० ज्योतिबेन मनुभाई भट्ट, पं०श्री श्रंगटि रंगाचार्य, पं० श्री या०वि०देवास्कर, डा० वैद्यिा, डा० जे०के०भट्ट, पं० श्री नटवरलाल याज्ञिक, पं० श्री विश्वनाथ दातार, पं० श्री कुलकर्णी, पं० श्री अशोक व०श्वोत, पं० श्री बसंत दा भट्ट, ज्योतिर्विदानांमुपकार भारं स्मरामि ।

अस्य शोधप्रबन्धस्य मार्गदर्शकानां वेदशास्त्र सम्पन्नानां पण्डितवर्याणां श्रीमन्त डा० प्रभाकर केशव डोंगरे गुरुचरणानां स्नेहं कारुण्यं च बारम्बार मम लोचन पथमवतरति। स्वकीये व्यस्तजीवने पि मत्कृते अमूल्यं समयं प्रदाय पितृवत् व्यवहारं आचरन् मार्गदर्शनं कृतवन्त: । एतेषां प्रेरणाया बारम्बारं उद्बोधनेन सम्यक् निर्देशनेन कुशल मार्गदर्शनेन एव अस्य शोध प्रबन्धस्य प्रस्तुतीकरणे समर्थ हं अत: गुरुचरणानां बारंबारं उपकारभारं स्मरामि । अस्य शोध प्रबन्धस्य विनिर्माणे डा० जयनारायण पाठक महोदयानां योगदानं कदापि अहं न विस्मरिष्यामि । पौन: पुन्येन तै: प्रेरितं एतत्पूर्वं, ममविद्यार्थीजीवने शैशवे श्रीमन्त: लक्ष्मीकान्त झा गुरुवर्याणां विचार: आशीर्वादश्चासी देव यदहं

जैमिनीय सूत्रं अधिकृत्य किंचिद् नावीन्यं उद्घाटयितुं सक्ता भविष्यामि । भूतपूर्व प्राच्यविद्यामन्दिरस्य नियामकानां प्रो० डा० अरुणोदय जानी महोदयानां तथा च प्रो० डा० सुरेशचन्द्र कांटावाला महोदयानामपि उपकारभारं स्मरामि । संस्कृत महाविद्यालय भूतपूर्व प्राचार्याणां हरिप्रसाद मेहता महोदयानामपि महत्वपूर्ण योगदानमस्ति।

अस्य प्रबन्धस्य विनिर्माणे म०स०विश्वविद्यालयस्य संस्कृत विभागाध्यक्षानां श्रीमंत: डा० राजेन्द्र नानावटी महोदयानां प्राच्यविद्या मन्दिरस्य नियामकानां डा० रामकृष्ण व्यास महोदयानां तु योगदानं अस्त्यैव तथा अस्माकं संस्कृत विद्यालयस्य प्राध्यापकानां श्रीमन्त: राजेन्द्र व्यास, चन्द्रकान्त जोशी, कनैयालाल पुरोहित, किशोरभाई र०वैद्य , उद्यन ह० शुक्ल, डा० रमेशचन्द्र गो० शाह, डा० हरिप्रसाद पाण्डेय, श्री योगेशभाई ओझा, गोविन्द आत्माराम राखे, महोदयै विचारेण । सहयोगेन पुस्तक प्रदानेन च मयि उपकृतं अत: उपकारभारं स्मरामि ।

अन्ते च विश्वविद्यालयस्य उपकुलपति प्रो० आर०सी०पटेल महोदयानां तथा च कुलसचिव श्री आर०बी०कोठारी महोदयानां सहयोग महती उपकृति च स्वीकृत्य विरमामि ।

विनायकाय सुधिये, गुहै: सदा नतायास्मै ।
पार्वती तनयायाहं, ग्रंथमेतं समर्पये ।।

मार्ग० कृष्ण० १
विक्रम संवत् २०४५
शनिवासरे
तारीख २४ -१२-१९८८

भावत्को
निरञ्जन चं. शुक्ल:
(शुक्ल निरंजन चन्द्रशंकर)

--